श्री

# शुक्रनीति

( प्राकृत समश्लोकीसह )

हें

पुस्तक

## रामचंद्र गोविंद शास्त्री


यांणीं

## श्रीमंत माहाराज तुकोजीराव होळकर सरकार बाहादूर

यांचे हुकुमावरून

अलीबाग येथें "सत्यसदन" छापखान्यांत छापिलें

Price Rs. 2 1/2
27th Feb. 1880
No. 569
VERIFIED 2007



# प्रस्तावना.

प्राचीन कवींनीं नीतिपर कित्येक ग्रंथ केले आहेत. परंतु त्यांत पृथक् पृथक् विषयांचें विवरण केलेलें असतें यामुळें कोणताही एक ग्रंथ वाचिल्यानें पुष्कळ गोष्टींचें ज्ञान होण्यास अडचण पडते. ती दूर होऊन सर्व विषय एका ठिकाणी ग्रथित मिळतील असा त्यांपैकीं "शुक्रनीति" हाच ग्रंथ फार उपयोगी आहे. यांत राजनीति, अश्वादिपरीक्षा, रत्न परीक्षा, व शिल्पशास्त्रसंबंधीं पुष्कळ प्रकारची माहिती इत्यादि २४ विषय आहेत. परंतु हा ग्रंथ संस्कृत असल्यामुळें प्राकृत जनांस दुर्बोध सबब त्याची प्राकृत समश्लोकी श्रीमद्गणेशोपासक **वे० शा० संपन्न गणपती बोवा ऊर्फ बाळासाहेब संस्थान सांवेर** यांणीं करून तो ग्रंथ त्यांणीं उपयुक्त विद्येचे ज्ञाते व भोक्ते **श्रीमंत माहाराज तुकोजीराव होळकर सरकार बाहादूर** यांस दिला तो त्यांचे हुकुमावरून आह्मी छापवून प्रसिद्ध केला आहे. या ग्रंथांतील विषय फार उपयुक्त असल्यामुळें ज्ञाते पुरुष यास आपले संग्रहीं ठेवतील अशी आह्मीं आशा करितों.

**रामचंद्र गोविंद शास्त्री.**

# शुक्रनीति

(प्राकृत समश्लोकीसह)

## ग्रंथांतील विषयांची श्लोकबद्ध

## अनुक्रमणिका.

शुक्रनीतौयानियानितानितानिब्रुवेपुरा
कार्याणिराज्ञःसामान्यंभूमिमानंतथैवच ॥ १ ॥
शुक्रनीतींतजींजींकांवदतोंआधिंसर्वतीं ॥ कार्यैंराजाससामान्यभूमीचेंमानहीतसें ॥ १ ॥

नगर्यादिप्रतिष्ठानंगृहादिकृतिकल्पनं
आद्याध्यायस्थितंह्येतत्पराध्यायस्थितंब्रुवे ॥२॥
नगराचेंवसवणेंघरादिबांधणेंतसें ॥ पूर्वाध्यायांतहेंआहेदुजांतीलवदेंतसें ॥ २ ॥

युवराजप्रकृत्यादिलक्षणंकृत्यमेवच
आयव्ययादिकंलेख्यंभृत्यानांभृतिकल्पनं ॥ ३ ॥
युवराजप्रधानादिकार्यलक्षणहीतसें ॥ जमाखर्चादिलिहिणेंभृत्यवेतनकल्पन ॥ ३ ॥

तृतीयेसर्वलोकानांन्यायेनपरिवर्तनं
चतुर्थेसुहृदादीनांलक्षणंदंडकल्पनं ॥ ४ ॥
तृतीयींसर्वलोकांचेंन्यायेंकरुनिवागणें ॥ चतुर्थींसुहृदादींचेंदंडकल्पनलक्षण ॥ ४ ॥

रत्नधातुगवादीनांज्ञानंमूल्यप्रकल्पनं
प्रजायाभागहरणंकलाविद्याप्रभेदनं ॥ ५ ॥
रत्नधातुगवादींचेंज्ञानहीमोलकल्पन ॥ प्रजेचेंभागहरणकलेविद्येसभेदणें ॥ ५ ॥

जातीनांभेदकथनंतद्धर्मपरिकल्पनं
ग्रामरक्षादिकथनंप्रासादादिप्रकल्पनं ॥६॥
जातींचेभेदकथनतयांचेंधर्मकल्पन ॥ गांवाचेंरक्षणतसेंमहालादिकबांधणें ॥ ६ ॥

मूर्त्यादीनांकृतिर्ज्ञानंव्यवहरप्रदर्शनं
दुर्गप्रकल्पनंचैवसैन्यप्रकरणंतथा ॥ ७ ॥

मूर्तिज्ञानातिचेंकर्णेव्यवहारासपाहणें ॥ किल्याचेंबांधणेंतेवीसैन्यप्रकरणातसें ॥ ७ ॥

रथक्रियांगजज्ञानंतथाचोष्ट्रपरीक्षणं
मनुष्याद्यायुषोमानंतथायात्राप्रकल्पनं ॥ ८ ॥

रथकर्णेंगजज्ञानतसेंउंटपरीक्षणें ॥ आयुर्माननरादींचेंचढाईकरणेंतसें ॥ ८ ॥

यंत्राणांलक्षणंचैवतथाग्नेश्चूर्णसाधनं
यंत्रप्रपातनंसम्यक्तथाशस्त्रस्यलक्षणं ॥ ९ ॥

यंत्रांचींलक्षणेनानादारूचेंकरणेंतसें ॥ निशाणलावणेंसूक्ष्मशस्त्राचेंतेविलक्षण ॥ ९ ॥

षड्गुणानांलक्षणंहितथाव्यूहप्रकल्पनं
कापट्यकरणंचैषांसंख्यावेदगुणात्मिका ॥ १० ॥

षड्गुणांचेंलक्षणतेंकवायदतऱ्हातशी ॥ कपटाकरणेंयांचीसंख्याचवतीसहोतसे ॥ १० ॥

श्री

# शुक्रनीति

(प्राकृतसमश्लोकीसह)

## अध्याय १ ला.

प्रणम्यजगदाधारंसर्गस्थित्यंतकारणं
संपूज्यभार्गवःपृष्टोवंदितःपूजितस्तुतः ॥ १ ॥
नमोनिजगदाधारासृष्टिस्थित्यंतकारका ॥ पुजोनिशुक्रपुशिलावंदितस्तुतपूजित ॥ १ ॥
पूर्वदेवैर्यथान्यायंनीतिसारमुवाचतान् । भा० उ०
शतलक्षश्लोकमितंनीतिशास्त्रमथोक्तवान् ॥ २ ॥
पूर्वदेवींयथान्यायनीतिसारवदेतयां ॥ शतलक्षश्लोकनीतिशास्त्रातेंआधिंबोलला. ॥ २ ॥
स्वयंभूर्भगवान्लोकहितार्थंसंग्रहेणवै
तत्सारंतुवसिष्ठाद्यैरस्माभिर्वृद्धिहेतवे ॥ ३ ॥
विधाताभगवान्लोकाहिताचेसाठींसंग्रहें ॥ त्याचेंसारवसिष्ठादिआह्मीहीवृद्धिसाठिंच ॥३॥
अल्पायुर्भूभृताद्यर्थंसंक्षिप्तंतर्कविस्तृतं
क्रियैकदेशबोधीनिशास्त्राण्यन्यानिसंतिहि ॥४॥
अल्पायुराजेत्यांसाठींसंक्षेपेंअर्थफारतो ॥ क्रियेच्नेएकदेशातेंशास्त्रेंहीसर्वबोधिती ॥ ४ ॥
सर्वोपजीवकंलोकस्थितिकृन्नीतिशास्त्रकं
धर्मार्थकाममूलंहिस्मृतंमोक्षप्रदंयतः ॥ ५ ॥
उपजीवकहेंसर्वांनीतिशास्त्रास्थितीकरी ॥ धर्मार्थकामींहेंमूलह्मणोनीमोक्षदायक ॥ ५ ॥
अतःसदानीतिशास्त्रमभ्यसेद्यत्नतोनृपः
यद्विज्ञानान्नृपाद्याश्चशत्रुजिल्लोकरंजकाः ॥ ६ ॥
सदाह्मणोनिनीतीतेंअभ्यासीधरणीपती ॥ जीचेज्ञानेंभूपशत्रुजयवान्लोकरंजक ॥ ६ ॥

सुनीतिकुशलानित्यंप्रभवंतिचभूमिपाः
शद्बार्थानांनकिंज्ञानंविनाव्याकरणतोभवेत् ॥७॥

सुनीतिंनित्यकुशलहोतातपृथिवीपती ॥ शद्बार्थज्ञानकींनाहींहोतव्याकरणाविना ॥ ७ ॥

प्राकृतानांपदार्थानांन्यायतर्कैर्विनानकिं
विधिक्रियाव्यवस्थानांनकिंमीमांसयाविना ॥८॥

कींप्राकृतपदार्थांचेंन्यायतर्काविनानसे ॥ विधिक्रियाव्यवस्थाहीमीमांसेवांचूनीनकीं ॥८॥

देहावधिनश्वरत्वंवेदांतैर्नविनाहिकिं
स्वस्वाभिमतबोधीनिशास्त्राण्येतानिसंतिहि ॥९॥

नाशिवंतशरीरादिवेदांतावांचुनीनकीं ॥ आपल्याबोधकमताशास्त्रेंआहेतसर्वही ॥ ९ ॥

तत्तन्मतानुगैःसर्वैर्विधृतानिजनैःसदा
बुद्धिकौशलमेतद्धितैःकिंस्याद्व्यवहारिणां ॥१०॥

त्यात्यामतानुगेंसर्वसर्वदाधृतहीजनें ॥ बुद्धिकौशलहेंयानेंहोकायव्यवहारिला ॥ १० ॥

सर्वलोकव्यवाहारस्थितिर्नीत्याविनानहि
यथाशनैर्विनादेहस्थितिर्नस्याद्धिदेहिनां ॥११॥

सर्वप्रजाव्यवाहारस्थितीनीतिविनानसे॥जशीअन्नाविनादेहस्थितिनाहींशरीरिची॥ ११॥

सर्वाभिष्टकरंनीतिशास्त्रंस्यात्सर्वसंमतं
अत्यावश्यंनृपस्यापिससर्वेषांप्रभुर्यतः ॥१२॥

सर्वांशिवदहोनीतिशास्त्रहेंसर्वसंमत॥अत्यावश्यकराजालाप्रजेचाप्रभुतोह्मणून् ॥ १२ ॥

शत्रवोनीतिहीनानांयथापथ्याशिनांगदाः
सद्यःकेचिच्चकालेनभवंतिनभवंतिच ॥१३॥

नीतिहीनांनृपांशत्रुअपथ्याशांशींरोगसे ॥ तत्कालकोणिकालानिहोतीवानाहिंहोतही ॥१३

नृपस्यपरमोधर्मःप्रजानांपरिपालनं
दुष्टनिग्रहणंनित्यंननीत्यातोविनाह्युभे १४ ॥

राजाचाधर्मपरमप्रजेचेंपरिपालन ॥ दुर्जनाचानाशतसाननीतीविणदोनही ॥ १४ ॥

अनीतिरेवसंछिद्रंराज्ञोनित्यंभयावहं
शत्रुसंवर्धनंप्रोक्तंबलह्रासकरंमहत् ॥ १५ ॥
अनीतिहेंमहाछिद्रराजालाभयदायक ॥ शत्रूचेंवृद्धिकरहेंसैन्याचेंनाशकारक ॥ १५ ॥

नीतिंत्यक्त्वावर्ततेयःस्वतंत्रःसहिदुःखभाक्
स्वतंत्रप्रभुसेवातुह्यसिधारावलेहनं ॥ १६ ॥
नीतीटाकोनिजोवागेमर्जीनेंदुःखभोगितो ॥स्वतंत्रप्रभुचीसेवातर्वारीलाचचाटणें ॥ १६ ॥

स्वाराध्योनीतिमान्राजादुराराध्यस्त्वनीतिमान्
यत्रनीतिबलेचोभेतत्रश्रीस्सर्वतोमुखी ॥ १७ ॥
नीतिज्ञासेवितांसौख्यदुःखताद्विपरीतया ॥ जेथेंनीतीसैन्यदोन्हीतेथेंश्रीसर्वतोमुख ॥ १७ ॥

अप्रेरितहितकरंसर्वराष्ट्रंभवेद्यथा
तथानीतिस्तुसंधार्यानृपेणात्महितायवै ॥ १८ ॥
नप्रेरितांहितकरराज्यहोसर्वहेंजसें ॥ तशीधरावीनीतीतेनृपेंआपहितासती ॥ १८ ॥

भिन्नंराष्ट्रंबलंभिन्नंभिन्नोमात्यादिकोगणः
अकौशल्यंनृपस्यैतदनीतेर्यस्यसर्वदा ॥ १९ ॥
भिन्नप्रजाभिन्नसैन्यप्रधानगणहीतसा ॥ अकौशल्यनृपाचेंहेसर्वदानीतिहीनजो ॥ १९ ॥

तपसातेजआदत्तेशास्त्रापाताचरंजकः
नृपःस्वप्राक्तनाद्धत्तेतपसाचमहीमिमां ॥ २० ॥
तपानेंतेजवान्होतोशास्त्रीपातीहिरंजवी ॥ राजानिजप्राक्तनानेंतपानेंरक्षितोमही ॥ २० ॥

वृष्टिशीतोष्णनक्षत्रगतिरूपस्वभावतः
इष्टानिष्टाधिकंन्यूनाचारैःकालस्तुभिद्यते ॥ २१ ॥
शितोष्णवृष्टिनक्षत्रगतिंरूपींस्वभाविंही ॥ शुभाशुभींथोरअल्पींआचारींकालभेदहो ॥ २१ ॥

आचारप्रेरकोराजाह्येतत्कालस्यकारणं
यदिकालःप्रमाणंहिकस्माद्धर्मोस्थिकर्तृषु ॥ २२ ॥
आचारप्रेरकनृपह्मणोनीकालकारण ॥ जरिप्रमाणहोकालकसाधर्मजनींवसे ॥ २२ ॥

राजदंडभयाल्लोकःस्वस्वधर्मपरोभवेत्
योहिस्वधर्मनिरतःसतेजस्वीभवेदिह ॥ २३ ॥

राजदंडभयेंलोकस्वधर्मीरतहोतसे ॥ जोस्वधर्मींहोयरततेजस्वीहोयतोइथे ॥ २३ ॥

विनास्वधर्मान्नसुखंस्वधर्मोहिपरंतपः
तपःस्वधर्मरूपंयद्वार्धितंयेनवैसदा ॥ २४ ॥

स्वधर्माविणनसुखतपश्रेष्ठस्वधर्महें ॥ स्वधर्मरूपतपहेंजेणेंवाढाविलेंसदा ॥ २४ ॥

देवास्तुकिंकरास्तस्यकिंपुनर्मनुजाभुवि
सुदंडैर्धर्मनिरतःप्रजाःकुर्यान्महाभयैः ॥२५॥

त्याचोकिंकरहोदेवकायतेमगमानव ॥ सुदंडेंधर्मनिरतकरावेजनभीतिनें ॥ २५ ॥

नृपःस्वधर्मनिरतोभूत्वातेजक्षयोन्यथा
अभिषिक्तोनाभिषिक्तोनृपत्वंतुयदाप्नुयात् ॥२६॥

राजाहोधर्मनिरतनतरीतेजहानिहो ॥ अभिषिक्तनवाराजानृपत्वाजरिपावला ॥ २६ ॥

बुध्याबलेनशौर्येणततोनीत्यानुपालयन्
प्रजाःसर्वाःप्रतिदिनमछिद्रोदंडधृक्सदा ॥२७॥

बुद्धिशौर्यबलेंभूपेंपाळावेंनीतिनेंसदा ॥ सर्वांजनांप्रातिदिनींअछिद्रेंदंडधारणें ॥ २७ ॥

नित्यबुद्धिमतोप्यर्थःस्वल्पकोपिविवर्धते
तिर्यङ्चोपिवशंयांतिशौर्यनीतिबलैर्धनैः ॥२८॥

बुद्धिवानसदाअर्थेंस्वल्पहीवाटतोबहू ॥ पशूहिवशहोतातिशौर्यनीतिबलेंधनें ॥ २८ ॥

सात्विकंतामसंचैवराजसंत्रिविधंतपः
यादृक्तपतियोत्यर्थंतादृक्भवतिसोनृपः ॥ २९ ॥

सात्विकाराजसातैसातामसात्रिविधातपा ॥ जैसातपासिकारिजोहोतोतैसाचतोनृप ॥२९ ॥

योहिस्वधर्मनिरतःप्रजानांपरिपालकः
यष्टाचसर्वयज्ञानांनेताशत्रुगणस्यच ॥ ३० ॥

जोआपल्याधर्मिरतप्रजेचापरिपालक ॥ यजितोसर्वयज्ञांजोजिंकीशत्रुगणासहो ॥३०॥

दानशौंडःक्षमीशूरोनिस्पृहोविषयेष्वपि
विरक्तःसात्विकःसोहिनृपोंतेमोक्षमन्वियात् ॥३१॥

दानदक्षक्षमाशीलविषयींबहुनिस्पृह ॥ विरक्ततोचिसात्वीकनृपमुक्ताचिशेवटीं ॥ ३१ ॥

विपरीतस्तामसःस्यात्सोंतेनरकभाजनः
निर्घृणश्चमदोन्मतोहिंसकःसत्यवर्जितः ॥ ३२ ॥

विपर्यासेंतामसतोअंतींनरकपात्रहो ॥ निर्लज्जजोमदोन्मत्तसत्येंराहितघातक ॥ ३२ ॥

राजसोदांभिकोलोभीविषयीवंचकश्शठः
मनसान्यश्चवचसाकर्मणाकलहाप्रियः ॥ ३३ ॥

दंभीलोभीवंचकतोविषयीधूर्तराजस ॥ मनींएकवचींतैसेंकर्मेंजोकलहाप्रिय ॥ ३३ ॥

नीचाप्रियःस्वतंत्रश्चनीतिहीनश्छलांतरः
सतीर्यक्त्वंस्छावरत्वंभावितांतेनृपाधमः ॥ ३४ ॥

नीचसंगीजोस्वतंत्रनयेंहीनस्छलांतर॥तोपशुवास्छावरवाहोतोंअंतींनृपाधम ॥ ३४ ॥

देवांशान्सात्विकोभुंक्तेराक्षसांशांस्तुतामसः
राजसोमानवांशांस्तुसत्वेधार्यमनोयतः ॥३५॥

सत्वीभोगीदेवअंशाराक्षसांशासतामस ॥ रजोगुणीमनुष्यांशायामनासत्विंठेविजे ॥ ३५ ॥

सत्वस्यतमसःसाम्यान्मानुषंजन्मजायते
यद्यदाश्रयतेमर्त्यस्ततुल्योदिष्टतोभवेत् ॥ ३६ ॥

सत्वेंतमेंसमीहोतांजन्ममानवहोतसे ॥ जेंजेंसंपादितोमर्त्यहोइप्रारब्धितोतसा ॥ ३६ ॥

कर्मैवकारणंचात्रसुगतिंदुर्गतिंप्रति
कर्मैवप्राक्तनमपिक्षणंकिंकोस्तिचाक्रियः ॥ ३७॥

कर्मेंचकरणइथेसुगतीदुर्गतीसही ॥ प्रारब्धहीपूर्वकर्मकोणीक्षणनअक्रिय ॥ ३७ ॥

नजात्याब्राह्मणश्चात्रक्षात्रियोवैश्यएवन
नशूद्रोनचवैम्लेंछोभेदितागुणकर्मभिः ॥ ३८ ॥

नजातीनेंविप्रइथेकोणीक्षात्रियवैश्यही ॥ नाहींशूद्रम्लेंछभेदगुणेंकर्मेंचभेदहो ॥ ३८ ॥

ब्रह्मणस्तुसमुत्पन्नाःसर्वेतेकिंनुब्राह्मणाः
नवर्णतोनजनकाद्ब्राह्म्यतेजःप्रपद्यते ॥ ३९ ॥
ब्रह्यापासूनउत्पन्नसर्वब्राह्मणकांनते ॥ नवर्णतातापासूनिब्रह्मतेजमिळेकदा ॥ ३९ ॥

ज्ञानकर्मोपासनाभिर्देवताराधनेरतः
शांतोदांतोदयालुश्चब्राह्मणश्चगुणैःकृतः ॥ ४० ॥
उपासनेंज्ञानकर्मीदेवआराधनींरत ॥ शांतदांतदयालूजोगुणेंकर्मेंहाविप्रतो ॥ ४० ॥

लोकसंरक्षणेदक्षश्शूरोदांतःपराक्रमी
दुष्टनिग्रहशीलोयःसवैक्षत्रियउच्यते ॥ ४१ ॥
जनांच्यापालनींदक्षदांतशूरपराक्रमी ॥ दुष्टांचानिग्रहकरीह्मणावाताचक्षत्रिय ॥ ४१ ॥

क्रयविक्रयकुशलायेनित्यंपण्यजीविनः
पशुरक्षाकृषिकरास्तेवैश्याःकीर्तिताभुवि ॥ ४२ ॥
घेण्यादेण्यांतकुशलनित्यबाजारजोकरी ॥ पशुरक्षीशेतकरीतोवैश्यजाणिजेसदा ॥ ४२ ॥

द्विजसेवार्चनरताःशूराःशांताजितेंद्रियः
सीरकाष्टतृणवहास्तेनिचाःशूद्रसंज्ञकाः ॥ ४३ ॥
विप्रसेवार्चनरतशूरदांतपराक्रमी ॥ हळकाष्टतृणावाहेनीचतोशूद्रसंज्ञक ॥ ४३ ॥

त्यक्तस्वधर्माचरणानिर्घृणाःपरापिडकाः
चंडाश्चहिंसकानित्यंम्लेंछास्तेह्यविवेकिनः ॥४४॥
टाकितीआपुल्याधर्मानिर्लज्जपरपीडक ॥ कोपीहिंसकतेम्लेंछसर्वदाअविचारिजे ॥४४॥

प्राक्कर्मफलभोगार्हाबुद्धिःसंजायतेनृणां
पापकर्मणिपुण्येवाकर्तुंशक्तोनचान्यथा ॥ ४५ ॥
प्राक्कर्मभोगण्यायोग्यबुद्धीहोतेचमानवा ॥ पुण्यकर्मासवापापकरायाबुद्धिनान्यथा॥ ४५ ॥

बुद्धिरुत्पद्यतेतादृग्यादृक्कर्मफलोदयः
सहायास्तादृशाएवयादृशीभवितव्यता ॥ ४६ ॥
तैसीचबुद्धिहीहोयेजैसाकर्मफलोदय ॥ साहायहीतसेहोतीपूढेंहोणारजोविजें ॥ २६ ॥

प्राक्कर्मवशतःसर्वंभवत्येवेतिनिश्चितं
तदोपदेशाव्यर्थास्युःकार्याकार्यप्रबोधकाः॥ ४७॥

पाठीमागीलकर्मानेंहोतेंहसर्वानिश्चित ॥ उपदेशहितेव्यर्थजेकार्याकार्यबोधक ॥ ४७ ॥

धीमंतोवंद्यचरितामन्यंतेपौरुषंमहत्
अशक्तपौरुषंकर्तुंक्लीबादैवमुपासते ॥ ४८ ॥

धीमंतवंद्यचरिततेजेयत्नासमानिती ॥ यत्नाकरूंदुर्बलजेषंढतेदैवमानिती ॥ ४८ ॥

दैवेपुरुषकारेचखलुसर्वंप्रतिष्ठितं
पूर्वजन्मकृतंकर्मेहार्जितंतद्विधाकृतं ॥ ४९ ॥

प्रारब्धींयत्निंहेंसर्वनिश्चयेंराहातेंसदा॥पूर्वजन्मींयाहिजन्मींकृतकर्मद्विधाहितें ॥ ४९ ॥

बलवत्प्रतिकारीस्याद्दुर्बलस्यसदैवहि
सबलाबलयोर्ज्ञानफलप्राप्त्वान्यथानहि ॥५० ॥

बलवत्टाकितेंमागेंदुर्बलालागिंसर्वदा॥बलीदुर्बलहेंज्ञानफलप्राप्तिविनानतें ॥ ५० ॥

फलोपलब्धिःप्रत्यक्षहेतुनानैवदृश्यते
प्राक्कर्महैतुकीसातुनान्यथैवेतिनिश्चयः ॥ ५१ ॥

फलाचालाभप्रत्यक्षहेतूनेंनदिसेकदा॥प्रारब्धहेतूतिजलानिश्चयेंअन्यथानतो ॥ ५१ ॥

यज्जायतेल्पाक्रिययान्नृणांवापिमहत्फलं
तदपिप्राक्तनादेवकेचित्प्रागिहकर्मजं ॥ ५२ ॥

अल्पक्रियेनेंजेंहोतेंमोठेंफलनरासही ॥ तेंपूर्वकृतकर्मानेंकोणीकर्मेंचियेथल्या ॥ ५२ ॥

वदंतीहैवाक्रिययाजायतेपौरुषंनृणां
सस्नेहवार्तिदीपस्यरक्षावातात्प्रयत्नतः ॥ ५३ ॥

क्रियेनेंवदतीयेथेंहोतेंपौरुषमानवा ॥ सतेलदीपज्योतीचेंयत्नेंवायूंतरक्षण ॥ ५३ ॥

अवश्यंभाविभावानांप्रतिकारोनचेद्यदि
दुष्टानांक्षपणंश्रेयोयावद्बुद्धिबलोदयं ॥ ५४ ॥

अवश्यंभाविजेंत्याचाप्रतिकारनसेजरी ॥ दुष्टांचानिग्रहकरीजोंवरीबलबुद्धिती ॥ ५४ ॥

प्रतिकूलानुकूलाभ्यांफलाभ्यांचनृपोप्यतः
ईषन्मध्याधिकाभ्यांचत्रिधादैवंविचिंतयेत् ॥५५॥
विपर्यस्तेंअनुकुलेंफलेंभूपेंझणोनियां ॥ अल्पमध्यथोरपणेंचितावेंदैवहेंत्रिधा ॥ ५५ ॥

रावणस्यचभीष्मादेर्वनभंगेचगोगृहे
प्रातिकूल्यंतुविज्ञातमेकस्मान्वानरान्नरात् ॥५६॥
रावणालागिंभीष्मातेंवनभंगांतगोग्रहीं ॥ वैपरीत्याजाणविलेंयेक्याद्यावानरेंनरें ॥ ५६ ॥

कालानुकूल्यंविस्पष्टंराघवस्यार्जुनस्यच
अनुकूलेयदादैवेक्रियाल्पासुफलाभवेत् ॥ ५७ ॥
अनुकूलतसेंस्पष्टराघवाअर्जुनाजसें ॥ दैवजेंव्हांसानुकूलक्रियासुफलअल्पही ॥ ५७ ॥

महतीसक्रियानिष्टफलास्यात्प्रतिकूलके
बलिर्दानेनसंबद्धोहरिश्चंद्रस्तथैवच ॥ ५८ ॥
सुयत्नहीव्यर्थहोतोजेंव्हांहोदैववांकुडें ॥ दानानेंबलिसंबद्धहोहरिश्चंद्रहीतसा ॥ ५८ ॥

भवतीष्टंसक्रिययानिष्टंतद्विपरीतया
शास्त्रतःसदसज्ज्ञात्वात्यक्त्वासत्सत्समाचरेत् ॥५९॥
इष्टहोतेंसक्रियेनेंविपरीतेंअनिष्टहो ॥ शास्त्रेंजाणोनिसदसत्असत्टाकीसतावरी ॥ ५९ ॥

कालस्यकारणंराजासदसत्कर्मणस्त्वतः
स्वक्रौर्योद्यतदंडाभ्यांस्वधर्मेस्थापयेत्प्रजा॥ ६०॥
राजाकारणकालाचापुण्यींपापींझणोनिही॥स्वक्रौर्येंउग्रदंडानेंस्वधर्मींस्थापिजेप्रजा॥ ६०॥

स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानिच
सप्तांगमुच्यतेराज्यंतत्रमूर्धानृपस्मृतः ॥ ६१ ॥
स्वामीप्रधानसुहृदकोशराष्ट्रचमूगड ॥ सप्तांगराज्यावदतात्यांतमाथानराधिप ॥ ६१ ॥

दृगमात्यासुहृछ्रोत्रंमुखंकोशोबलंमनः
हस्तौपादौदुर्गराष्ट्रौराज्यांगानिस्मृतानिहि ॥६२॥
मंत्रीडोळेकर्णमित्रसुखकोशचमूमन ॥ राष्ट्रकिल्लाहस्तपादराज्यांगेंहींचजाणिजे ॥ ६२॥

अंगानांक्रमशोवक्ष्येगुणान्भूतिप्रदान्सदा
येर्गुणैस्तुसुसंयुक्तावृद्धिमंतोभवंतिहि ॥ ६३ ॥
सांगेअनुक्रमेंअंगगुणाभूतिप्रदासदा ॥ ज्यागुणांनींयुक्तहोतांवृद्धितेंपावतातहो ॥ ६३ ॥

राजास्यजगतोहेतुर्वृध्यैर्वृद्धाभिसंमतः
नयनानंदजनकःशशांकइवतोयधेः ॥ ६४ ॥
राजाजगाच्याह्याहेतुवृद्धिलावृद्धसंमत ॥ नेत्राआनंदजनकसमुद्राचंद्रहाजसा ॥ ६४ ॥

यदिनस्यान्नरपतिःसम्यङ्नेतातातःप्रजाः
अकर्णधाराजलधौविप्लवेतोहनौरिव ॥ ६५ ॥
जरीनसेनरपतीसुपालकतरीप्रजा ॥ नावाज्यावांचुनीनांवसमुद्रांतवसेजशी ॥ ६५ ॥

नतिष्ठंतिस्वस्वधर्मेविनापालेनवैप्रजाः
प्रजयातुविनास्वामीपृथिव्यांनैवशोभते ॥ ६६ ॥
स्वधर्मिनावागतसेपालकाविणहीप्रजा ॥ प्रजेवांचूनिहीस्वामीनशोभेपृथिवीवरी ॥ ६७ ॥

न्यायप्रवृत्तोनृपतिरात्मानमथचप्रजाः
त्रिवर्गेणोपसंधत्तेनिहंतिध्रुवमन्यथा ॥ ६७ ॥
न्यायींप्रवृत्तनृपतीआपणालाप्रजेसही ॥ करीत्रिवर्गीसंहिततनतरीसर्वघालवी ॥ ६७ ॥

धर्माद्वैपवनोराजाविधायबुभुजेभुवं
अधर्माच्चैवनहुषःप्रतिपेदेरसातलं ॥ ६८ ॥
धर्मेंराजावैपवनभोगीपृथ्वीससर्वदा ॥अधर्मेंभूपनहुषपावलाचिरसातला ॥ ६८ ॥

वेनोनष्टस्त्वधर्मेणपृथुर्वृद्धस्तुधर्मतः
तस्माद्धर्मपुरस्कृत्ययततेतार्थायपार्थिवः ॥ ६९ ॥
नष्टझालावेनपापेंधर्मानेंवाढलापृथु ॥ यापुढेंकरूनीधर्माझटावेंअर्थसाधनीं ॥ ६९ ॥

योहिधर्मपरोराजादेवांशोन्यश्चरक्षसां
अंशभूतोधर्मलोपिप्रजापीडाकरोभवेत् ॥ ७० ॥
जोधर्मीरततोअंशेंदेवतोअन्यराक्षस ॥ धर्माचालोपकर्ताजोप्रजापीडकहोइतो ॥ ७० ॥

इंद्रानिलयमार्काणामग्नेश्चवरुणस्यच
चंद्रवित्तेशयोश्चापिमात्रानिर्हृत्यशाश्वती ॥ ७१ ॥
इंद्रवायूयमरवीअग्नीवरुणहीतसा ॥ कुबेराचाहिचंद्राचाअंशघेऊनिशाश्वत ॥ ७१ ॥

जंगमस्थावराणांचहीशःस्वतपसातभवेत्
भागभाग्रक्षणेदक्षोयथेंद्रोनृपतिस्तथा ॥७२ ॥
जंगमस्थावराचाहीहोतोस्वामीनिजेतपें ॥ रक्षणींदक्षभागाचाभोक्ताइंद्रतसानृप ॥७२॥

वायुर्गंधस्यसदसत्कर्मणःप्रेरकोनृपः
धर्मप्रवर्त्तकोधर्मनाशकस्तमसोरविः ॥ ७३ ॥
गंधाचावायुसदसत्कर्मांचानरपालक ॥ धर्मप्रकाशकतमाअधर्माराविनाशक ॥ ७३ ॥

दुष्कर्मदंडकोराजायमस्याद्दंडकृद्यमः
अग्निश्शुचिस्तथाराजारक्षार्थंसर्वभागभुक् ॥७४ ॥
दुष्कर्मादंडकनृपजसादंडकरीयम ॥ अग्निशुद्धतसाराजारक्षणासाठिंभागभुक् ॥ ७४ ॥

पुष्यत्यपांरसैःसर्वंवरुणःस्वधनैर्नृपः
करैश्चंद्रोल्हादयतिराजास्वगुणकर्मभिः ॥ ७५ ॥
पोषीजलानेंसर्वांतेंवरुणस्वधनेंनृप ॥ तोषीकरींचंद्रजनांनिजकर्मींगुणींनृप ॥ ७५ ॥

कोशानांरक्षणेदक्षःस्यान्निधीनांधनाधिपः
चंद्रांशेनविनासर्वैरंशैर्नोभातिभूपतिः ॥ ७६ ॥
धनाच्यारक्षणींदक्षकुबेरनिधिचाजसा ॥ चंद्रांशावांचुनीराजानशोभेसर्वहीगुणी ॥ ७६ ॥

पितामातागुरुर्भ्राताबंधुर्वैश्रवणोयमः
नित्यंसप्तगुणैरेषांयुक्तोराजानचान्यथा ॥ ७७ ॥
पितामातागुरुभ्राताबंधुद्रव्येशहीयम ॥ गुणांनींयुक्तयासातींभूपतोअन्यथानहो ॥ ७७ ॥

गुणसाधनसंदक्षःस्वप्रजायाःपितायथा
क्षमयित्र्यपराधानांमातापुष्टिविधायिनी ॥ ७८ ॥
गुणांच्यासाधनींदक्षस्वप्रजेलापिताजसा ॥ क्षमिताअपराधांचामातापोषीसुताजसी ॥७८॥

हितोपदेष्टाशिष्यस्यसुविद्याध्यापकोगुरुः
स्वभागोद्धारकृद्भ्रातायथाशास्त्रंपितुर्धनात् ॥ ७९ ॥
हितोपदेशीशिष्याला सुविद्यासांगतागुरू ॥ भागाचाग्राहकभ्राताशास्त्रेंपितृधनाजसा ॥ ७९ ॥

आत्मस्त्रीधनगुह्यानांगोप्ताबंधुस्तुमित्रवत्
धनदस्तुकुबेरस्याद्यमस्याच्चसुदंडकृत् ॥ ८० ॥
आत्मस्त्रीधनगुह्याचात्रातावंधुसखातसा ॥ कुबेरद्रव्यदानींहोयमहोदंडकारक ॥ ८० ॥

प्रवृद्धिमतिसंराज्ञिनिवसंति गुणाअमी
एतेसप्तगुणाराज्ञानहातव्याःकदाचन ॥ ८१ ॥
वाढणाऱ्यानृपामध्येंराहतीहेसदागुण ॥ भूपानेंसातगुणहेनसोडावेकधींचही ॥ ८१ ॥

क्षमतेयोपराधंसःशक्तःसदमनेक्षमी
क्षमयातुविनाभूपोनभात्यखिलसद्गुणैः ॥ ८२ ॥
क्षमीजोअपराधातेंशासनींशक्तहीजरी ॥ क्षमेवांचूनिभूपालनशोभेसर्वसद्गुणीं ॥ ८१ ॥

स्वान्दुर्गुणान्परित्यज्यह्यतिवादांस्तितिक्षते
दानैर्मानैश्चसत्कारैःस्वप्रजारंजकःसदा ॥ ८३ ॥
दुर्गुणांसोडुनिनिजांनिंदेलाक्षमिजेसदा ॥ दानेंमानेंसुसत्कारेंस्वप्रजारंजवीसदा ॥ ८३ ॥

दांतःशूरश्चशस्त्रास्त्रकुशलोरिनिषूदनः
अस्वतंत्रश्चमेधावीज्ञानाविज्ञानसंयुतः ॥ ८४ ॥
शस्त्रींअस्त्रींदक्षदमींशूरशत्रुविनाशक ॥ धीमान्शास्त्रपराधीनज्ञानविज्ञानसंयुत ॥ ८४ ॥

नीचहीनोदीर्घदर्शीवृद्धसेवीसुनीतियुक्
गुणिजुष्टस्तुयोराजासज्ज्ञेयोदेवतांशकः ॥ ८५ ॥
नीच्यासोडीसेविवृद्धापाहतादूरनीतिमान् ॥ गुणांनींयुक्तजोराजाजाणावादेवतांशतो ॥ ८५ ॥

विपरीतस्तुरक्षोंशःसवैनरकभाजनः
नृपांशसदृशोनित्यंतत्सहायगणःकिल ॥ ८६ ॥
वैपरीत्येंराक्षसांशजोतोनरकपात्रहो ॥ नृपाचाअंशसदृशसहायगणहीसदा ॥ ८६ ॥ ॥

तत्कृतंमन्यतेराजासंतुष्यतिचमोदते
तेषामाचरणैर्नित्यंनान्यथानियतेर्बलात् ॥ ८७ ॥

तत्कृतामानितोराजातोषतोमोदतोतिहीं॥ त्यांच्याआचरणींदैवेंअन्यथानकदापिही॥८७॥

अवश्यमेवभोक्तव्यंकृतंकर्मफलंनरैः
प्रतिकारैर्विनानैवप्रतिकारेकृतेसति ॥ ८८ ॥

अवश्यलागेभोगायाकृतकर्मशुभाशुभ ॥ प्रतिकाराविनानाहींप्रतिकारकरीजरी॥ ८८ ॥

तथाभोगायभवतिचिकित्छितगदोयथा
उपदिष्टनिष्टहेतौतत्तत्कर्तुंयतेतकः ॥ ८९ ॥

भोगायाहीतसालागेजैसारोगाचिकिच्छित ॥ बोधितांहेंदुःखमूलआचरीमगकोणतें॥८९॥

रज्यतेसत्फलेस्वांतंदुष्फलेनहिकस्यचित्
सदसद्बोधकान्येवदृष्ट्वाशास्त्राणिचाचरेत्॥ ९० ॥

रंजेसुखफलींचितकोणाचेंहीनदुष्फलीं॥ शुभाशुभाबोधकरशास्त्रेंपाहूनिआचरीं ॥९०॥

नयस्यविनयोमूलंविनयःशास्त्रनिश्चयात्
विनयस्येंद्रियजयस्तद्युक्तशास्त्रमृच्छाति ॥९१॥

नीतीचेंमूळविनयहोतोतोशास्त्रनिश्चयें ॥ विनयेंइंद्रियजयशास्त्रतेणेंचिपावतो ॥ ९१ ॥

आत्मानंप्रथमंराजाविनयेनोपपादयेत्
ततःपुत्रांस्ततोमात्यांस्ततोभृत्यांस्ततःप्रजां॥९२॥

आत्म्यातेंभूपप्रथमसंपादीविनयींसदा ॥ पुत्रामगप्रधानातेंभृत्यामगप्रजेसही ॥ ९२ ॥

परोपदेशकुशलःकेवलोनभवेन्नृपः
प्रजाधिकारहीनस्यात्सगुणोपिनृपःक्वचित् ॥९३॥

परोपदेशींकुशलनहोयनृपकेवळ ॥ राज्याधिकारच्युतहोगुणीहीजरिभूपती ॥ ९३ ॥

नतुनृपविहीनास्युर्दुर्गुणाह्यपितुप्रजा
यथानविधवेंद्राणीसर्वदातुतथाप्रजा ॥९४॥

राजाविनानराहेतीदुर्गुणीजारिहीप्रजा ॥ जशीनविधवाहोयेइंद्राणितेंविहीप्रजा ॥ ९४ ॥

भ्रष्टश्रीःस्वामितारा‍ज्ञोनृपएवनमंत्रिणः
तथाविनीतदायादोदांताःपुत्रादयोपिच ॥ ९५ ॥
होतोराज्यभ्रष्टनृपनाहींहोतप्रधानही ॥ ज्याचेबंधुदुर्विनीतदुष्टपुत्रादिमंडळी ॥ ९५ ॥

सदानुरक्तप्रकृतिःप्रजापालनतत्परः
विनीतात्माहिनृपतिर्भूयसींश्रियमश्नुते ॥ ९६ ॥
तुष्टज्याचेप्रधानादिप्रजापालनतत्पर ॥ नम्रस्वभावेंनृपतीमोठ्याश्रीलागिपावतो ॥ ९६ ॥

प्रकीर्णविषयारण्येधावंतंविप्रमाथिनं
ज्ञानांकुशेनकुर्वीतवशमिंद्रियदंतिनं ॥ ९७ ॥
गहनींविषयारण्यींधांवेजोमददुर्धर ॥ ज्ञानांकुशानेंवशत्याकरावेंइंद्रियागजा ॥ ९७ ॥

विषयामिषलोभेनमनःप्रेरयतींद्रियं
तन्निरुध्यात्प्रयत्नेनजितेतस्मिन्जितेंद्रियः ॥ ९८ ॥
विषयींआमिषाशेनेंइंद्रियाप्रेरितेंमन ॥ त्यातेंनिरोधीयत्नानेंयाजिंकीतोजितेंद्रिय ॥ ९८ ॥

एकस्यैवहियोशक्तोमनसःसंन्निबर्हणे
महींसागरपर्यंतांसकथंह्यवजेष्यति ॥ ९९ ॥
अशक्तजोअसेएक्यामनाच्यारोधनींनृप ॥ पृथ्वीसमुद्रपर्यंतकशीजिंकीलतोस्वयें ॥ ९९ ॥

क्रियावसानविरसैर्विषयैरपहारिभिः
गच्छत्याक्षिप्तहृदयःकरीवनृपतिर्गृहं ॥ १०० ॥
अंतींक्रियेच्याविरसींविषयींअपहारिकीं ॥ जातोआकृष्टमनतोगजसानृपबंधना ॥ १०० ॥

शब्दःस्पर्शश्चरूपंचरसोगंधश्चपंचमः
एकैकस्त्वलमेतेषांविनाशप्रतिपत्तये ॥ १ ॥
शब्दस्पर्शरूपरसगंधहेपांचहीसदा ॥ येकेकहेफारहोतिविनाशालागिंसर्वदा ॥ १ ॥

शुचिर्दर्भांकुराहारोविदूरभ्रमणेक्षमः
लुब्धकोद्गीतमोहेनमृगोमृगयतेवधं ॥ २ ॥
शुद्धदर्भांकुराखाईजायादूरसमर्थही ॥ व्याधाच्यागीतलोभानेंमरणाशोधितोमृग ॥ २ ॥

गिरींद्रशिखराकारोलीलयोन्मूलितद्रुमः
करिणीस्पर्शसंमोहाद्बंधनंयातिवारणः ॥ ३ ॥

मस्तशृंगतसादेहेंलीलेनेंमोडिजोद्रुमा ॥ हस्तिनीस्पर्शमोहानेंबंधनापावतोगज ॥ ३ ॥

स्निग्धदीपशिखालोकविलोलितविलोचनः
मृत्युमृछातिसंमोहात्पतंगःसहसापतन् ॥ ४ ॥

पाहूनिदीपज्योतीतेंनयनबिहुउत्सुक ॥ मृत्युतेंनेणतांमोहेंपतंगसहसापडे ॥ ४ ॥

अगाधसलिलेमग्नोदूरेपिवसतोवसन्
मीनस्तुसामिषंलोहमास्वादयतिमृत्यवे ॥ ५ ॥

बुडोनिमोठ्याजोडोहींराहेदूरस्छलींजरी ॥ मच्छसामिषलोहाचाघेतोस्वादनमृत्युचा ॥ ५ ॥

उत्कर्तितुंसमर्थोपिगंतुंचैवसपक्षकः
द्विरेफोगंधलोभेनकमलेयातिबंधनं ॥ ६ ॥

जायासमर्थफोडूनिउडोनीजोसपक्षही ॥ हाभृंगगंधलोभानेंकमलींबंधपावतो ॥ ६ ॥

एकैकशोविनिघ्नंतिविषयाविषसन्निभाः
किंपुनःपंचमिलिताःनकथंनाशयंतिहि ॥ ७ ॥

येकेकहोविषयहेशक्तनाशाजसेंविष ॥ मिळालेपांचजारिहेनाशानकरितीकसे ॥ ७ ॥

द्यूतंस्त्रीमद्यमेवैतात्रितयंबव्हनर्थकृत्
अयुक्तंयुक्तियुक्तंहिधनपुत्रमतिप्रदं ॥ ८ ॥

द्यूतस्त्रीमद्यहींतीन्हीअनर्थकरितीबहू ॥ बहूतथोडींहींदेतीधनापुत्रामतीसही ॥ ८ ॥

नलधर्मप्रभृतयःसुद्यूतेनविनाशिताः
सकापट्यंधनायालंद्यूतंभवतितद्विदां ॥ ९ ॥

नलधर्मादिनृपतीद्यूतानेंनाशपावले ॥ द्रव्यप्राप्तीसकपटद्यूतेंहोद्यूतजाणत्या ॥ ९ ॥

स्त्रीणांनामापिसंल्हादिविकरोत्येवमानसं
किंपुनर्दर्शनंतासांविलासोल्लासितभ्रुवां ॥ १० ॥

स्त्रीनामआनंदकरविकारकरिमानसा ॥ दर्शनेंकायसांगावेंविलासोल्लासितभ्रुच्या ॥ १० ॥

---

१ ( विलासेंकरून उल्लसित आहेत भृकुटी जीच्या)

रहःप्रचारकुशलामृदुगद्गदभाषिणी
कंननारीवशीकुर्यान्नरंरक्तांतलोचना ॥ ११ ॥
एकांतकार्यकुशलसहर्षमृदुबोलकी ॥ कोणावशकरीनास्त्रीनरारक्तांतलोचना ॥ ११ ॥
मुनेरपिमनोवश्यंसरागंकुरुतेंगना
जितेंद्रियस्यकावार्ताकिंपुनश्चाजितात्मनां ॥१२ ॥
मुनीच्याहीमनावश्यसप्रेमकरिअंगना ॥ जितेंद्रियाचेंहिकरीअजिताचीकथाकिती ॥१२॥
व्यायछंतश्चबहवःस्त्रीषुनाशंगताअमी
इंद्रदंडक्यनहुषरावणाद्यासदाह्यतः ॥ १३ ॥
इच्छितांहीपरस्त्रीतेंनाशागेलेबहूतहे ॥ दंडकीइंद्रनहुषरावणादिकहेह्मणून् ॥ १३ ॥
अतत्परनरस्यैवस्त्रीसुखायभवेत्सदा
साहायिनीगृह्यकृत्येतांविनान्यानविद्यते ॥ १४ ॥
नरजोअतत्परनसेत्यातेंस्त्रीसुखदायक ॥ साहायगृहकृत्यालादुजेतीच्याविनानसे ॥ १४ ॥
अतिमद्यंहिपिबतोबुद्धिलोपोभवेत्किल
प्रतिभांबुद्धिवैशद्यंधैर्यंचित्तविनिश्चयं ॥ १५ ॥
मद्यबहुपितांहोतोबुद्धीचालोपनिश्चयें ॥ प्रतिभाबुद्धिविमलधैर्याचित्तविनिश्चया ॥ १५ ॥
तनोतिमात्रयापीतंमद्यमन्यद्विनाशकृत्
कामक्रोधौमद्यतमौनियोक्तव्यौयथोचितं ॥ १६ ॥
विस्तारीथोडकेंघेतांविनाशकारिफारहें ॥ मद्याधिकक्रोधकामयोजावेतेयथोचित ॥ १६ ॥
कामःप्रजापालनेचक्रोधःशत्रुनिबर्हणे
सेनासंधारणेलोभोयोज्योराज्ञाजयार्थिना ॥१७॥
प्रजेच्यापालनींकामक्रोधशत्रुगणींतसा ॥ सेनेच्याधारणींलोभयोजावाजयइच्छुनें ॥ १७ ॥
परस्त्रीसंगमेकामोलोभोनान्यधनेषुच
स्वप्रजादंडनेक्रोधोनैवधार्योनृपैःकदा ॥ १८ ॥
परस्त्रीसंगमींकामअन्यद्रव्यींनलोभतो ॥ स्वप्रजादंडनींक्रोधनधरावानृपेंकदा ॥ १८ ॥

किमुच्यतेकुटुंबीतिपरस्त्रीसंगमान्नरः
स्वप्रजादंडनाच्छूरोधनिकोन्यधनैश्चकिं ॥ १९ ॥

कुटुंबीकायवदतीपरस्त्रीसंग्रहेंनरा ॥ स्वप्रजादंडणेंशूरपरद्रव्येंधनीककीं ॥ १९ ॥

अरक्षितारंनृपतिब्राह्मणंचातपस्विनं
धनिकंचाप्रदातारंदेवाघ्नंतित्यजंत्यधः ॥ २० ॥

अरक्षित्यानृपालातेंतपानकारिविप्रत्या ॥ धनीअदातात्यादेवमारितीखालिंटाकिती ॥२०॥

स्वामित्वंचैवदातृत्वंधनिकत्वंतपःफलं
एनसः फलमर्थित्वंदास्यत्वंचदरिद्रता ॥२१॥

स्वामीउदारधनिकतपाचेंहेंपाहाफल ॥ पापाचेंयाचकपणदासताहीदरिद्रता ॥ २१ ॥

दृष्ट्वाशास्त्राण्यतोत्मानंसन्नियम्ययथोचितं
कुर्यान्नृपःस्ववृत्तांतुपरत्रेहसुखायच ॥ २२ ॥

पाहूनशास्त्रेंचित्तालानियमावेंयथोचित ॥ स्ववृत्ताकारिजेभूपेंयेथेंतेथेंसुखाजसें ॥ २२ ॥

दुष्टनिग्रहणंदानंप्रजायाःपरिपालनं
यजनंराजसूयादेःकोशानांन्यायतोर्जनं ॥२३॥

दुष्टनिग्रहसद्दानप्रजेचेंपरिपालन ॥ राजसूयादियजनन्यायानेंकोशसंग्रह ॥ २३ ॥

करदीकरणंराज्ञांरिपूणांपरिमर्दनं
भूमेरुपार्जनंभूयोराजवृत्तंतुचाष्टधा ॥ २४ ॥

करीकरदभूपांतेंरिपूंचेंपरिमर्दन ॥ भूचेंसंपादनसदाअष्टधाराजवृत्तहें ॥ २४ ॥

नवर्धितंबलंयैस्तुनभूपाःकरदीकृताः
नप्रजाःपालिताःसम्यक्तेवैषंढातिलान्नृपाः ॥२५॥

वाढाविलेंनासैन्यातेंनकेलेंकरदानृपा ॥ प्रजासुपाळिल्यानाहींतेषंढतिलसेनृप ॥ २५ ॥

प्रजासूद्विजतेयस्माद्यत्कर्मपरिनिंदति
त्यज्यतेधनिकैर्यस्तुगुणिभिस्तुनृपाधमः ॥ २६ ॥

प्रजानिवृत्तजाहूनिजाचिकर्मासनिंदिते ॥ टाकितीजाधनिकहीगुणीहीतोनृपाधम ॥२६ ॥

नटगायकगणिकामल्लषंढाल्पजातिषु
योतिसक्तोनृपोनिंद्यःसहिशत्रुमुखेस्थितः ॥२७॥
वेश्यागातेमल्लनटषंढादिनीचजातिंत ॥ जोसक्तनृपतोनिंद्यतोचिशत्रुमुखींस्थित ॥२७॥

बुद्धिमंतंसदाद्वेष्टिमोदतेवंचकैःसह
स्वदुर्गुणंनैववेत्तिस्वात्मनाशायसोनृपः ॥२८॥
बुद्धिमंतासदाद्वेषीपावेहर्षासवंचकी ॥ जाणेनदुर्गुणास्वीयास्वनाशासाठिंभूपतो ॥२८॥

नापराधंहिक्षमतेप्रदंडोधनहारकः
स्वदुर्गुणःश्रवणतोलोकानांपरिपीडकः ॥ २९ ॥
अपराधाक्षमीनाजोक्रूरदंडेंधनाहरी ॥ स्वदुर्गुणाच्याश्रवणेंलोकांतेंपरिपीडक ॥ २९ ॥

नृपोयदातदालोकःक्षुभ्यतेभिद्यतेयतः
गुढचारैःश्रावयित्वास्ववृत्तंदूषयंतिके ॥ ३० ॥
भूपजेव्हांप्रजातेव्हांहोक्षुब्धफितरीम्हणून॥गुप्तचारेंऐकिजावेंस्ववृत्ताकोणदोषती॥ ३० ॥

भूषयंतिचकैर्भावैरमात्याद्याश्चतद्विदः
मयिकीदृक्कूचसंप्रीतिःकेषामप्रीतिरेववा ॥ ३१ ॥
कायभावेंभूषवितीप्रधानादिकजाणते ॥ माझेठाईंकशीप्रीतिकोणाचीतिनिसेकसी ॥३१॥

ममागुणैर्गुणैर्वापिगुढंसंश्रुत्यचाखिलं
चारैःस्वदुर्गुणंज्ञात्वालोकतःसर्वदानृपः ॥ ३२ ॥
माझ्यागुणींवाअगुणींऐकोनिगुप्तसर्वही ॥ जाणोनिदुर्गुणादूतींलोकांहूनिसदानृप ॥३२॥

सुकीर्त्यैसंत्यजेन्नित्यंनावमन्येतवैप्रजाः
लोकोनिंदतिराजंस्त्वांचारैःसंश्रावितोयदि ॥३३॥
सुकीर्तिसाठींटाकावेंअवमानूनयेप्रजा ॥ राजातुलालोकानिंदीऐकवीदूतहेंजरी ॥ ३६ ॥

कोपंकरोतिदौरात्म्याआत्मदुर्गुणलोपकः
सीतासाध्व्यपिरामेणत्यक्त्वालोकापवादतः॥३४॥
कोपाकरीदुस्वभावेंलपवीआत्मदुर्गुणा ॥ सीतासतीतरीरामेंत्यजिलीजनभीतिनें ॥ ३४ ॥

शक्तेनापिहिनधृतोदंडोल्पोरजकेक्वचित्
ज्ञानविज्ञानसंपन्नेराजदत्ताभयेपिच ॥ ३५ ॥
शक्तेंहिधरिलानाहींरजकींदंडअल्पही ॥ ज्ञानविज्ञानसहितराजाअभयदेजरी ॥ ३५ ॥

समक्षंवाक्तिनभयाद्राज्ञोगुर्वोपिदूषणं
स्तुतिप्रियाहिवैदेवाविष्णुमुख्याइतिश्रुतिः ॥३६॥
भयेंसमक्षनवदेमोठेहीदोषतोनृपा ॥ स्तुतिप्रियअसेदेवाविष्णुमुख्याअशीश्रुति ॥ ३६ ॥

किंपुनर्मनुजानित्यंनिंदाजःक्रोधइत्यतः
राजासुभागदंडीस्यात्सुक्षमीरंजकःसदा ॥३७॥
मनुष्यकायमगतेनिंदाक्रोधासकारण ॥ राजासुभागेंसदंडेंक्षमीरंजावेताजना ॥ ३७ ॥

यौवनंजीवितंचित्तंछायालक्ष्मीश्चस्वामिता
चंचलानिषडेतानिज्ञात्वाधर्मरतोभवेत् ॥ ३८ ॥
चित्तयौवनआयुष्यछायालक्ष्मीधनीपणा ॥ जाणूनिचंचलसहारतधर्मीरहासदा ॥३८॥

अदानेनापमानेनछलाच्चकटुवाक्यतः
राज्ञःप्रबलदंडेननृपंमुंचातिवैप्रजा ॥ ३९ ॥
अदानेकृपणत्वानेंछद्मानेकटुभाषणे ॥ राजाच्याउग्रदंडानेंनृपाटाकितहीप्रजा॥ ३९ ॥

विपरीतगुणैरेभिःसान्वयारज्यतेप्रजा
एकस्तनोतिदुष्कीर्तिर्दुर्गुणःसंघशोनकिं ॥४० ॥
विपरीतगुणांनींयासवंशारंजतेप्रजा ॥ एकहीकरिदुष्कीर्तिदोषसंघनतोकसा ॥ ४० ॥

मृगयाक्षास्तथापानंगर्हितानिमहीभुजां
दृष्टास्तेभ्यस्तुविपदोपांडुनैषधवृष्णिषु ॥ ४१ ॥
कींचूतमद्यमृगयाबहूवाइटभूभुजां ॥ याहूनिपाहिलीहानीपांडुनैषधयादवां ॥ ४१ ॥

कामक्रोधस्तथामोहोलोभोमानोमदस्तथा
षड्वर्गमुत्सृजेदेनमस्मिंस्त्यक्तेसुखीनृपः॥ ४२॥
कामक्रोधतसामोहलोभमानामदासहां ॥ टाकावेंयुक्तिनेंयांतेंटाकितांयासुखीनृप ॥४२॥

दंडक्योनृपतिःकामात्क्रोधाच्चजनमेजयः
लोभादैलस्तुराजर्षिर्मोहाद्वातापिचासुरः ॥ ४३ ॥
दंडक्यनृपतीकामेंक्रोधानेंजनमेजय ॥ लोभानेंऐलराजर्षीमोहेंवातापिदैत्यतो ॥ ४३ ॥

पौलस्त्योराक्षसोमानान्मदाद्दंभोद्भवोनृपः
प्रयातानिधनंह्येतेशत्रुषड्वर्गमाश्रिताः ॥ ४४ ॥
मानेंराक्षसपौलस्त्यदंभोद्भवतसामदें ॥ पावलेनिधनातेंहेशत्रुषट्कासमाश्रित ॥ ४४ ॥

शत्रुषड्वर्गमुत्सृज्यजामदग्न्यःप्रतापवान्
अंबरीषोमहाभागोबुभुजातेचिरंमहीं ॥ ४५ ॥
शत्रुषड्वर्गटाकूनिपुत्रतोजमदग्निचा ॥ अंबरीषमहाभागभूतेंहेभोगितीसदा ॥ ४५ ॥

वर्धयन्निहधर्मार्थौसेवितौसद्भिरादरात्
निगृहीतेंद्रियग्रामोकुर्वीतगुरुसेवनं ॥ ४६ ॥
इथेंवाढविधमार्थाजातेंसेवितिसज्जन ॥ दाइंद्रियांसजिंकूनिकरावेंगुरुसेवन ॥ ४६ ॥

शास्त्रायगुरुसंयोगशास्त्रंविनयवृद्धये
विद्याविनीतोनृपतिःसतांभवतिसंमतः ॥ ४७ ॥
गुरुसेवाशास्त्रहेतुविनयाशास्त्रकारण ॥ विद्याविनीतनृपतीसाधूलाबहुसंमत ॥ ४७ ॥

प्रेर्यमाणोप्यसद्वृत्तैर्नाकार्येषुप्रवर्तते
श्रुत्यास्मृत्यालोकतश्चमनसासाधुनिश्चितं ॥ ४८ ॥
दुर्वृत्तांनींप्रेरितांहीअकार्यांनप्रवर्तती ॥ श्रुतिस्मृतींनींलोकाहूनमनानेंसाधुनिश्चित ॥ ४८ ॥

यत्कर्मधर्मसंज्ञंतद्व्यवस्यतिचपंडितः
आददानप्रतिदानकलासम्यक्महीपतिः ॥ ४९ ॥
धर्मसंज्ञकजेंकर्मकरितोतेंचपंडित ॥ आदानप्रतिदानादिकलातेसाधुभूपती ॥ ४९ ॥

जितेंद्रियस्यनृपतेर्नीतिशास्त्रानुसारिणः
भवंत्युच्चलितालक्ष्म्यःकीर्तयश्चनभस्पृशः ॥ ५० ॥
जितेंद्रियनृपालातेनीतीनेंवागतांसदा ॥ प्रफुल्लहोतीसंपत्तिकीर्तीदिस्वर्गगामिनी ॥ ५० ॥

आन्वीक्षिकीत्रयीवार्तादंडनीतिश्चशाश्वतिः
विद्याचतस्त्रएवैताअभ्यसेन्नृपतिःसदा ॥ ५१ ॥

आन्वीक्षिकीत्रयीवार्तादंडनीतिहिशाश्वती॥विद्यात्याचारभुवनीं अभ्यासाव्यानृपेंसदा॥ ५१॥

आन्वीक्षिक्यांतर्कशास्त्रंवेदांताद्यंप्रतिष्ठितं
त्रय्यांधर्मोत्द्यधर्मश्चकामोकामःप्रतिष्ठितः ॥ ५२॥

आन्वीक्षिकींतवेदांतन्यायशास्त्रादिशोभती ॥ त्रयींतधर्माधर्मादिकाममोक्षप्रतिष्ठित॥ ५२॥

अर्थानर्थौतुवार्तायांदंडनीत्यांनयानयौ
वर्णासर्वाश्रमाश्चैवविद्यास्वासुप्रतिष्ठिताः॥ ५३ ॥

अनर्थअर्थवार्तैंतदंडनीतींनयानय ॥ वर्णआश्रमहेसारेयाविद्येनींचउक्तहे ॥ ५३ ॥

अंगानिवेदाश्चत्वारोमीमांसान्यायविस्तरः
धर्मशास्त्रपुराणानित्रयीदंसर्वमुच्यते ॥ ५४ ॥

साहीअंगेंचारिवेदमीमांसान्यायविस्तर ॥ धर्मशास्त्रेंपुराणेंहींसांगिजेलींत्रयींमध्यें ॥ ५४ ॥

कुसीदकृषिवाणिज्यंगोरक्षावार्तयोच्यते
संपन्नोवार्तयासाधुर्नवृतेर्भयमृछति ॥ ५५ ॥

व्याजसेतीवणिक्कर्मवार्तेनेंगाइरक्षण ॥ वार्तासंपन्नजोसाधुनवृत्तिभयपावतो ॥ ५५ ॥

दमोदंडइतिख्यातस्तस्माद्दंडोमहीपतिः
तस्यनीतिर्दंडनीतिर्नयनान्नीतिरुच्यते ॥ ५६ ॥

दमालादंडह्मणतीह्मणोनीदंडभूपति ॥त्याचीनीतिदंडनीतिनयनेंनीतिबोलती ॥ ५६ ॥

आन्वीक्षिक्यात्मविज्ञानाद्धर्षशोकौव्युदस्यति
उभौलोकाववाप्नोतित्रय्यांतिष्ठन्यथाविधि ॥५७॥

आन्वीक्षिकीनेंआत्मज्ञहर्षशोकासटाकितो॥दोन्हीलोकांसहापावेत्रयीमार्गींसेविता॥ ५७॥

अनृशंस्यंपरोधर्मःसर्वप्राणभृतांयतः
तस्माद्राजानृशंस्येनपालयेत्कृपणंजनं ॥ ५८ ॥

अहिंसाधर्मपरमसर्वांचाहाह्मणूनियां ॥ अहिंसापरराजानेंव्हावेंदीनासरक्षिजे ॥ ५८ ॥

नहिस्वसुखमन्विच्छन्पीडयेत्कृपणंजनं
कृपणःपीड्यमानस्वमृत्युनाहंतिपार्थिवं ॥ ५९ ॥

नच्छिस्वसुखइच्छूनिपीडावेदीनलोकहे ॥ दीनपीडिततोस्वीयमृत्युनेंनाशिपार्थिवा ॥ ५९ ॥

सुजनैःसज्जनंकुर्याद्धर्मायचसुखायच
सेव्यमानस्तुसुजनैर्महानातिविराजते ॥ ६० ॥

सुजनाशींसंगकरीसुखाधर्मासदायक ॥ सेविजेतोसुजनिंजो तोमहान्बहुशोभतो ॥ ६० ॥

हिमांशुमालीवतथानवोत्फुल्लोत्पलंसरः
आनंदयतिचेतांसियथासुजनचेष्टितं ॥ ६१ ॥

चंद्रमाजेविकरितोप्रफुल्लकमलासरा ॥ आनंदवीतोचित्तांततसासुजनचेष्टित ॥ ६१ ॥

ग्रीष्मसूर्यांशुसंतप्तमुद्वेजनमनाश्रयं
मरुत्स्थलमिवोदग्रंत्यजेद्दुर्जनसंगतं ॥ ६२ ॥

ग्रीष्मींसूर्यांशुनींतप्तउद्वेजकअनाश्रय ॥ मारवाडापरीउग्रटाकावेदुष्टसंगत ॥ ६२ ॥

निश्वासोद्गीर्णहुतभुक्धूमधूम्रीकृताननैः
वरमाशीविषैःसंगंकुर्यान्नत्वेवदुर्जनैः ॥ ६३ ॥

वमितश्वासहुतभुक्धूमेंधूसरतोंडजे ॥ सर्पांशींबरासंगनकराबाचदुर्जनीं ॥ ६३ ॥

क्रियतेभ्यर्हणीयायसुजनाययथांजलिः
ततःसाधुतरःकार्योदुर्जनायहितार्थिना ॥ ६४ ॥

करिजेत्येजशीमान्यासुजनालागिंअंजली ॥ करीभारीतयाहूनिस्वहितासाठिंदुर्जना ॥ ६४ ॥

नित्यंमनोपहारिण्यावाचाप्रल्हादयेज्जगत्
उद्वेजयतिभूतानिक्रूरवाग्धनदोपिसन् ॥ ६५ ॥

सदामनोहरवचेंआनंदापाववीजना ॥ उद्विग्नदुष्टवाणीनेंधनदेताहिहोतसे ॥ ६५ ॥

हृदिविद्धइवात्यर्थंयथासंतप्यतेजनः
पीडितोपिहिमेधावीनतांवाचमुदीरयेत् ॥ ६६ ॥

हृदयींविद्धअत्यंतसंतप्तहिबहूजरी ॥ जरीपीडितहीधीमान्दुष्टवाग्नवदेकदा ॥ ६६ ॥

प्रियमेवाभिधातव्यंनित्यंसत्सुद्विषत्सुवा
शिखीवकेकांमधुरांवाचंब्रूतेजनप्रियः ॥ ६७ ॥

बोलावेंगोडसर्वांशीं सुजनींवासुदुर्जनीं ॥ मयूरजेवींकेकेतेंबोलतोप्रियलोकया ॥ ६७ ॥

मदरक्तस्यहंसस्यकोकिलस्याशिखंडिनः
हरंतिनतथावाचोयथावाचोविपश्चितां ॥ ६८ ॥

मदानेंरक्तहंसाचीकोकिलाचीशिखंडिची ॥ हरितीनतशीजैशीवाणीविबुधकल्पित ॥ ६८ ॥

येप्रियाणिप्रभाषंतेप्रियमिछंतिसत्कृतं
श्रीमंतोवंद्यचरितादेवास्तेनरविग्रहाः ॥ ६९ ॥

जेसदाबोलतीगोडसुकृतींहितइछिती ॥ श्रीमंतवंद्यचरितदेवतेनररूपकीं ॥ ६९ ॥

नहीदृशंसंवननंत्रिषुलोकेषुविद्यते
दयामैत्रीचभूतेषुदानंचमधुराचवाक् ॥ ७० ॥

वशीकरणनाऐसेंत्रैलोक्यामाजिदूसरें ॥ भुतामाजीदयामैत्रीदानवाणीसुधासम ॥ ७० ॥

श्रुतिरास्तिक्यपूतात्मापूजयेद्देवतांसदा
देवतावद्गुरुजनमात्मवच्चसुहृज्जनान् ॥ ७१ ॥

वेदींसद्भावपूतात्मापूजिजेदेवतासदा ॥ देवापरीगुरुजनानिजापरिसुहृज्जना ॥ ७१ ॥

प्रणिपातेनहिगुरून्संतोनूचानवेष्टितः
कुर्वीताभिमुखान्देवान्भूत्यैसुकृतकर्मणा ॥ ७२ ॥

नमस्कारेंगुरुजनासुजनांलागिगौरवें ॥ स्वकल्याणासुकर्मानेंसंपादीदेवतुष्टितें ॥ ७२ ॥

सद्भावेनहरेन्मित्रंसद्भावेनचबांधवान्
स्त्रीभृत्यौप्रेममानाभ्यांदाक्षिण्येनेतरंजनं ॥ ७३ ॥

सुभावमित्रांठेवावातेवींबंधुजनींसदा ॥ स्त्रीदासाप्रेममानानेंधौर्यानेंइतरांजनां ॥ ७३ ॥

बलवान्बुद्धिमान्शूरोयोहियुक्तपराक्रमी
वित्तपुर्णांमहींभुंक्तेसभूपोभूपतिर्भवेत् ॥ ७४ ॥

बलवान्बुद्धिमान्शूरयथायोग्यपराक्रमी ॥ वित्तपूर्णमहीभोगीनृपतोभूपहोतसे ॥ ७४ ॥

पराक्रमोबलंबुद्धिःशौर्यमेतेवरागुणाः
एभिर्हीनोन्यगुणयुग्महीभुक्सधनोपिच ॥ ७५ ॥

बुद्धीपराक्रमबलशौर्यहेगुणमुख्यहो ॥ यागुणींहीनअन्यानींयुक्तभूपधनींजरी ॥ ७५ ॥

महींस्वल्पांनैवभुंक्तेद्रावराज्याद्विनश्यति
महाधनाच्चनृपतेर्विभात्यल्पोपिपार्थिवः ॥ ७६ ॥

नभोगीअल्पहीभूतेंत्वरेनेंराज्यनाशहो ॥ महाधननृपाहूनिअल्पहीभूपशोभतो ॥ ७६ ॥

अव्याहताज्ञस्तेजस्वीएभिरेवगुणैर्भवेत्
राज्ञःसाधारणास्त्वन्येनशक्ताभूप्रसाधने ॥ ७७ ॥

सर्वांआज्ञामान्यतसातेजस्वीयागुणींनृप ॥ सामान्यअन्यभूपातेंतेभूसंपादनींगुण ॥ ७७ ॥

खनिःसर्वधनस्येयंदेवदैत्यविमार्दिनी
भूम्यर्थेभूमिपतयःस्वात्मानंनाशयंत्यपि ॥ ७८ ॥

खाणीसर्वधनाचीहीदेवदैत्यविनाशिका॥ भूमीसाठींभूमिपतिआत्म्यातेंहीविनाशिती॥ ७८॥

उपभोगायचधनंजीवितंयेनरक्षितं
नरक्षितातुभूर्येनकिंतस्यधनजीवितैः ॥ ७९ ॥

उपभोगार्थचिधनज्याणेंजीवितराखिलें ॥ भूतेंनरक्षिलेंजाणेंकायत्याधनजीवितीं ॥ ७९ ॥

नयथेष्टव्ययायालंसंचितंतुधनंभवेत्
सदागमाद्विनाकस्यकुबेरस्यापिनांजसा ॥ ८० ॥

यथेच्छखर्चकरण्यानसंचितपुरेंधन ॥ सदाप्राप्तीविनानाहींकुबेरालाहिसर्वदा ॥ ८० ॥

पूज्यस्त्वेभिर्गुणैर्भूपोनभूपःकुलसंभवः
नकुलेपूज्यतेयादृग्बलशौर्यपराक्रमैः ॥ ८१ ॥

पूज्यभूपगुणानांयानभूपकुलसंभव ॥ कुळेंनपूज्यहोतेसाबलशौर्यपराक्रमें ॥ ८१ ॥

लक्षकर्षमितोभागोराजतोयस्यजायते
वत्सरेवत्सरेनित्यंप्रजानांत्वविपीडनैः ॥ ८२ ॥

येतोवसूलजाराजारुपयेयेकलाखहो ॥ प्रतिसंवत्सरींसदाप्रजेतेंपीडिल्याविना ॥ ८२ ॥

सामंतःसन्नृपःप्रोक्तोयावल्लक्षत्रयावधि
तदूर्ध्वंदशलक्षांतोनृपोमांडलिकस्मृतः ॥ ८३ ॥

सामंतकथिजेल्यातोजोवरीतीनलाखते ॥ दशलक्षावरीत्याहून्बोलतीमांडलीकत्या ॥८३ ॥

तदूर्ध्वंतुभवेद्राजायावद्विंशतिलक्षकः
पंचाशल्लक्षपर्यंतोमहाराजःप्रकीर्तितः ॥ ८४ ॥

त्याहूनिमोठातोराजाजोवरीवीसलाखते ॥ पन्नासलक्षपावेतोंमहाराजअशीप्रथा ॥८४ ॥

ततस्तुकोटिपर्यंतःस्वराट्सम्राट्ततःपरं
दशकोटिमितोयावद्विराट्तुतदनंतरं ॥ ८५ ॥

तिथूनकोटिपर्यंतस्वराट्सम्राट्तयापुढें ॥ पर्यंतदशकोटीच्यातदनंतरतोविराट् ॥ ८५॥

पंचाशत्कोटिपर्यंतसार्वभौमस्ततःपरं
सप्तद्वीपाचपृथिवीयस्यवश्याभवेत्सदा ॥ ८६ ॥

पन्नासकोटिपावेतोंसार्वभौमतयापुढें ॥ सप्तद्वीपवतीभूहिजयावश्यअसेसदा ॥ ८६ ॥

स्वभागभृत्यादास्यत्वेप्रजानांचनृपःकृतः
ब्रह्मणास्वामिरूपस्तुपालनार्थंहिसर्वदा ॥ ८७ ॥

भागदानेंचहादाससंपादितजनींसहा ॥ ब्रह्मदेवेंस्वामिरूपपालनार्थचिसर्वदा ॥ ८७ ॥

सामंतादिसमायेतुभृत्याअधिकृताभुवि
तेनुसामंतसंज्ञास्यूराजभागहराःक्रमात् ॥ ८८ ॥

सामंतसमजेकोणीभूकामावरियोजिले ॥ अनुसामंतसंज्ञात्याराजाचेभागहारक ॥ ८८ ॥

सामंतादिपदभ्रष्टास्तत्तुल्यंभृतिपोषिताः
महाराजादिभिस्तेतुहीनसामंतसंज्ञकाः ॥ ८९ ॥

सामंतादिपदभ्रष्टातेतुकेंजांसवेतन ॥ महाराजादिकांनीतेहीनसामंतसंज्ञक ॥ ८९ ॥

शतग्रामाधिपोयस्तुसोपिसामंतसंज्ञकः ॥
शतग्रामेचाधिकृतोनुसामंतोनृपेणसः ॥ ९० ॥

स्वामीजोशतगांवांचातोहीसामंतसंज्ञक ॥ शतगांवींअधिकृतअनुसामंततोनृपें ॥ ९० ॥

अधिकृतोदशग्रामेनायकःसचकीर्तितः
आशापालोयुतग्राममभागभाक्चस्वराडपि ॥९१ ॥
दहागांवांअधिकृततोचिनायकत्रोलिला ॥ दिगीशअयुतग्राममभागदाहिस्वराडही ॥९१॥
भवेक्रोशात्मकोग्रामोरूप्यकर्षसहस्त्रकः
ग्रामार्धकंपल्लिसंज्ञंपल्ल्यर्धंकुंभसंज्ञकं ॥ ९२ ॥
कोसाचाहोयतोगांवहजाररुपयेजिथे॥गांवाचाअर्धतोपल्लीकुंभातीचाहिअर्धतो ॥ ९९ ॥
करैःपंचसहस्त्रैर्वाक्रोशःप्रोक्तःप्रजापतेः
हस्तैश्चतुसहस्त्रैर्वामनोःक्रोशस्यविस्तरः ॥ ९३ ॥
पांचहज्जारहातांनींविधिचाकोसबोलिला ॥ चारहज्जारहातांचामनुचाकोशविस्तर॥९३॥
सार्धद्विकोटिहस्तैश्चक्षेत्रंक्रोशस्यब्रह्मणः
पंचविंशशतैःप्रोक्तंक्षेत्रंतद्विनिवर्तनैः ॥ ९४ ॥
अडीचकोटिहातांचेंकोसक्षेत्रवदेविधि ॥ पंचवीसकरींहोतेंक्षेत्रतेंहिनिवर्तनीं ॥ ९४ ॥
मध्यमामध्यमपर्वदैर्घ्यंयच्चतदंगुलं
यवोदरैरष्टभिस्तद्दैर्घ्यंस्थौल्यंतुपंचभिः ॥ ९५ ॥
मध्यमेचेंमध्यपर्वलांबीजीतेंचअंगल ॥ यवांचींआठउदरेंलांबीस्थूलत्वपांचहीं ॥ ९५ ॥
चतुर्विंशत्यंगुलैस्तैःप्राजापत्यःकरःस्मृतः
सश्रेष्ठोभूमिमानेतुतदन्यास्त्वधमामताः ॥ ९६ ॥
चोवीसअंगुलानींत्याविधिचाहोतसेकर ॥तोमुख्यभूमिमानासअधमाजाणिजेदुजा ॥९६ ॥
चतुःकरात्मकोदंडोलघुःपंचकरात्मकः
तदंगुलंपंचयवैर्मानवंमानमेवतत् ॥ ९७ ॥
चारहातेंदंडलघुमोठापंचकरात्मक ॥ जेंबोटहोपांचयवेंमनुचेंमानतेंअसे ॥ ९७ ॥
वसुषण्मुनिसंख्याकैर्यवैर्दंडःप्रजापतेः
यवोदरैःषट्शतैस्तुमानवोदंडउच्यते ॥ ९८ ॥
सातसेंअडुसष्टानींयवानींविधिदंडतो ॥ सहाशेंयवमध्यानींमनुचादंडबोलती ॥ ९८ ॥

पंचविंशतिभिर्दंडैरुभयोस्तुनिवर्तनं
त्रिंशच्छतैरंगुलैर्यवैस्त्रिपंचसहस्त्रकैः ॥ ९९ ॥

होतेंपच्चीसदंडांनीं दोघांचेंहीनिवर्तन ॥ तीसशेंअंगुलयवींतीनहजारपांचवा ॥ ९९ ॥

सपादशतहस्तैश्चमानवंतुनिवर्तनं
ऊनविंशतिसाहस्त्रैर्दशतैश्चयवोदरैः ॥ १०० ॥

होतेंसवाशेंहातांचेंनिवर्तनमनूमतें ॥ येकोणीसहजारदोनशतींहोतयवोदरीं ॥ १०० ॥

चतुर्विंशशतैरेवह्यंगुलैश्चनिवर्तनं
प्राजापत्यंतुकथितंशतैश्चैवकरैःसदा ॥ १ ॥

होतेचोवीसशांनींहोबोटांनींतेंनिवर्तन ॥ प्रजापतीचेंकाथितशतहस्तेंचसर्वदा ॥ १॥

सपादषट्शतादंडाउभयोश्चनिवर्तने
निवर्तनान्यपिसदोभयोर्वैपंचविंशतिः ॥ २ ॥

सवासहाशेंदंडांचेंदोहोंचेंहीनिवर्तन ॥ निवर्तनेंहींदोघांचींहोतीपंच्चीसतींसदा ॥ २ ॥

पंचसप्ततिसाहस्त्रैरंगुलैःपरिवर्तनं
मानवंषष्ठिसाहस्त्रैःप्राजापत्यंतथांगुलैः ॥ ३ ॥

पंचाहतरहजारांनींबोटांनींपरिवर्तन ॥मनूचेंसाठहज्जारविधिचेंहोयअंगुलीं ॥ ३ ॥

पंचविंशाधिकैर्हस्तैरेकात्रिंशच्छतैर्मनोः
परिवर्तनमाख्यातंपंचविंशशतैःकरैः ॥ ४ ॥

पंचविसाधीकहातींमनूचेंएकतीसशें ॥परिवर्तनतेंहोतेंहातांनींपंचवीसशें ॥ ४ ॥

प्राजापत्यंपादहीनचतुर्लक्षयवैर्मनोः
अशीत्यधिकसाहस्त्रचतुर्लक्षयवैःपरं ॥ ५ ॥

विधिचेंपावणेचारलक्षींयविमनूमतें ॥ ऐशीअधीकहज्जारचारलाक्षयवींदुजें ॥ ५ ॥

निवर्तनानिद्वात्रिंशन्मनुमानेनतस्यवै
चतुःसहस्त्रहस्तास्युर्दंडाश्चाष्टशतानिहि ॥ ६ ॥

निवर्तनेंहींबत्तीसशतेंयाचींमनूमतें ॥ चारहज्जारतेहातआठशेंदंडहीतया ॥ ६ ॥

पंचविंशतिभिर्दंडैर्भुजस्यात्परिवर्तने
करैरयुतसंख्याकैःक्षेत्रंतस्यप्रकीर्तितं ॥ ७ ॥
होतोपंच्वीसदंडांनींभुजतोपरिवर्तनीं ॥ दाहाहज्जारहातांचेंतयाचेंक्षेत्रबोलती ॥ ७ ॥

चतुर्भुजैःसमंप्रोक्तंकष्टभूपरिवर्तनं
प्राजापत्येनमानेनभूभागहरणंनृप ॥ ८ ॥
चारीभुजींसमअसेंशेतभूचेंनिवर्तन ॥ प्रजापतीच्यामानानेंभूभारहरणाकरी ॥ ८ ॥

सदाकुर्याच्चस्वापत्तौमनुमानेननान्यथा
लोभात्संकर्षयेद्यस्तुहीयतेसप्रजोनृपः ॥ ९ ॥
आपत्कालींकदाकाळींमनुमानेंकरूनियां ॥ घेतांअधीकलोभानेंहीनहोनृपसप्रजा ॥ ९ ॥

नदद्याद्व्यंगुलमपिभूमेःस्वत्वनिवर्तनं
वृत्यर्थंकल्पयेद्वापियावत्ग्राहस्तुजीवति ॥ १० ॥
नद्यावीदोनबोटेंहीभूमीस्वस्वत्वकाढुनी ॥ वृत्तीसाठींकल्पिजावीघेणाराजोंवरीअसे ॥ १० ॥

गुणीतावद्देवतार्थेविसृजेच्चसदैवहि
आरामार्थंगृहार्थंवादद्यादष्ट्वाकुटुंबिनं ॥ ११ ॥
गुणीजोंवरिदेवालाद्यावीभूसर्वदांनृपें ॥ बगीचालाघरालावाकुटुंबापाहुनीनृपें ॥ ११ ॥

नानावृक्षलताकीर्णेपशुपक्षिगणावृते
सुबहूदकधान्येचतृणकाष्टसुखेसदा ॥ १२ ॥
नानावृक्षलतायुक्तींपशुपाक्षिगणींतसें ॥ जेथेंपाणीधान्यबहूतृणकाष्टादिपुष्कळ ॥ १२ ॥

आसिंधुनौगमाकूलेनातिदूरमहीधरे
सुरम्यसमभूदेशेराजधानींप्रकल्पयेत् ॥ १३ ॥
नावसिंधूवरींचालेअदूरगतिपर्वत ॥ नामीसमानभूदेशींराजधानीकरीनृप ॥ १३ ॥

अर्धचंद्रांवर्तुलांवाचतुरस्त्रांसुशोभनां
सप्राकारांसपरिखांग्रामादीनांनिवेशिनीं ॥ १४ ॥
वाटोळीवाअर्धचंद्राचतुरस्त्रसुशोभित ॥ कोटखंदकसंयुक्तपुरेगंजजिचामधीं ॥ १४ ॥

सभामध्यांकूपवापीतडागादियुतांसदा
चतुर्दिक्षुचतुर्द्वारांसुमार्गारामवीथिकां ॥ १९ ॥
मध्यींसभाकूपवापीतलावींसुविराजित ॥ चारीदिशेसदर्वाजेसुमार्गबागपंगतीं ॥ १९ ॥

दृढसुरालयमठपांथशालाविराजितां
कल्पयित्वावसेत्तत्रसुगुप्तःसप्रजोनृपः ॥ १६ ॥
दृढदेवालयमठधर्मशाळाविराजित ॥ अशीकरूनियांराहीप्रजारक्षीतभूपति ॥ १६ ॥

राजगृहंसभामध्यंगवाश्वगजशालिकं
प्रशस्तवापीकूपादिजलयंत्रैःसुशोभितं ॥ १७ ॥
राजवाडामध्यसभाशाळागोगजवाजिचा ॥ मोठ्यावापीकूपनळजलयंत्रविराजित॥ १७॥

सर्वतःस्यात्समभुजंदक्षिणोच्चमुदङ्नतं
शालांविनानैकभुजंतथाविषमबाहुकं ॥ १८ ॥
चारीबाजूसमखणदक्षिणेउंचभागतो ॥ शालेविनानैकपाखेंखणेंविषमहोतसें ॥ १८ ॥

प्रायःशालानैकभुजाचतुशालंविनाशुभा
शस्त्रास्त्रधारिसंयुक्तंप्राकारंसुदृढयंत्रकं ॥ १९ ॥
चौशाळेबांधुनीनाहींशाळाहीएकपाखिची ॥ बंदूकढालतर्वारधरतोफाविराजित ॥ १९ ॥

सत्रिकक्षचतुर्द्वारंचतुर्दिक्षुसुशोभनं
दिवारात्रौसशस्त्रास्त्रैःप्रतिकक्षासुगोपितं ॥ २० ॥
देवड्यातीनदर्वाजेचारचारीदिशेसते ॥ दिवारात्रींशस्त्रधरींप्रतिदेवाडिरक्षित ॥ २० ॥

चतुर्भिःपंचभिःषड्डियामिकैःपरिवर्तकैः
भ
नानागृहोपकार्याद्यसंयुतंकल्पयेत्सदा ॥ २१ ॥
साहाडिकवापांचचारअसावेपाहारेकरी ॥ नानाघरेंसभागाञ्चिमाड्यांनींतोसुशोभित॥ २१ ॥

वस्त्रादिमार्जनार्थंचस्नानार्थंयजनार्थकं
भोजनार्थंचपाकार्थंपूर्वस्यांकल्पयेत्गृहान् ॥ २२॥
वस्त्राधुण्यासतेंस्नानायज्ञाचासाठिंहोतसें ॥ भोजनापाककरण्यापूर्वेसकारिजेघरें ॥ २२ ॥

निद्रार्थंचविहारार्थंपानार्थंरोदनार्थकं
धान्यार्थंघरटाद्यर्थंदासीदासार्थमेवच ॥ २३ ॥

विहारनिद्रापानालारोदनाधान्यसंग्रहा ॥ घरटादासीदासांनामलोत्सर्गासदक्षिणें ॥२३॥

उत्सगार्थंगृहान्कुर्याद्दक्षिणस्यामनुक्रमात्
गोमृगोष्ट्रगजाद्यर्थंगृहान्प्रत्यक्प्रकल्पयेत् ॥२४॥

अनुक्रमानेंहिघरेंकरिजावींनृपेंसदा ॥ मृगगाईउंटगजांसाठींशालाहिपश्चिमें ॥२४॥

रथवाज्यस्त्रशस्त्रार्थंव्यायामायामिकार्थकं
वस्त्रार्थकंतुद्रव्यार्थंविद्याभ्यासार्थमेवच ॥ २५ ॥

रथघोडेशस्त्रअस्त्रशिपायांकसरतीसही ॥ वस्त्रजामूदारखानाहीविद्याभ्यासकरावया ॥२५॥

उदग्गृहान्प्रकुर्वीतसुगुप्तान्सुमनोहरान्
यथासुखानिवाकुर्याद्गृहाण्येतानिवैनृपः ॥ २६ ॥

उत्तरेसकरावींहींघरेंपरमशोभित ॥ करावेंअड्चणीनेंवासुखायेतीलतेविहीं ॥ २६ ॥

धर्माधिकरणंशिल्पशालांकुर्याददुग्गृहात्
पंचमांशाधिकोच्छ्रायाभित्तिर्विस्तारतोगृहे ॥२७॥

आदालतेलामिस्तरिचाखानादूजाहिउत्तरे ॥ उंचपंचांशअधिकभिंतरुंदीहुनीकरी॥२७॥

कोष्टविस्तारषष्ठांशस्थूलासाचप्रकीर्तिता
एकभूमेरिदंमानमूर्ध्वमूर्ध्वंसमंततः ॥ २८ ॥

खणविस्तारषष्ठांशकारिजेभिंतरुंदती ॥ एकमजल्यासहेंमानदुमजल्यादिसमानतें ॥ २८

स्तंभैश्चाभित्तिभिर्वापिपृथक्कोष्टानिसन्यसेत्
त्रिकोष्टंपंचकोष्टंवासप्तकोष्टंगृहंस्मृतं ॥ २९ ॥

खांबांनींभितिनींकिवावेगळेकरिजेखण ॥ तीनकिंवापांचखणसातांचेंवाकरीघर ॥२९॥

द्वारार्थमष्टधाभक्तंद्वारस्यांशौतुमध्यमौ
द्वौद्वौज्ञेयौचतुर्दिक्षुधनपुत्रप्रदौनृणा ॥ ३० ॥

आठयाचेभागकरीमध्यांशींद्वारयोजिजे ॥ चारीदिशेदोनदोनधनपुत्रमातिप्रद ॥३० ॥

तत्रैवकल्पयेद्द्वारंनान्यथातुकदाचन
वातायनंपृथक्कोष्ठेकुर्याद्यादृक्सुखावहं ॥ ३१ ॥
तियेचकरिजेदारवेगळेंनकरीकदा ॥ खिडूकीखणाप्रतिकरीयथासुखजसीघडे ॥३१॥

अन्यगृहद्वाराविद्धंगृहद्वारंनचिंतयेत्
वृक्षकोणस्तंभमार्गपीठकुपैश्चवेधितं ॥ ३२ ॥
दारासमोरअन्याच्यानिजद्वारनयोजिजे ॥ वृक्षकोणस्तंभमार्गपीठकूपासमोरन ॥३२॥

प्रासादमंडपद्वारेमार्गवेधोनविद्यते
गृहपीठंचतुर्थांशमुच्छ्रायस्यप्रकल्पयेत् ॥ ३३ ॥
देवभूपगृहद्वारींमार्गवेधनसेकदा ॥ पायाघरासउंचीचाचतुर्थांशकरीसदा ॥ ३३ ॥

प्रासदानांमंडपानांमर्धांशंवापरेजगुः
परवातायनैर्विद्धंनापिवातायनंस्मृतं ॥ ३४ ॥
प्रासादामंडपाकोणीअर्धांशानेंहिबोलती ॥ परखिड्कीवेधयुक्ताखिड्कीतेंनकरीकदा॥३४॥

विस्तारार्धांशमूलोच्चाछदिःखर्परसंभवा
पतितंतुजलंतस्यांसुखंगछतिवाप्यधः ॥ ३५ ॥
विस्तारार्धेंऊंचकरीमध्येंछापरउंचतें ॥ अथवावाहतेंपाणीपर्जन्याचेंसुखेंजसें ॥ ३५ ॥

हीनानिम्नाछदिर्नस्यात्तादृक्कोष्ठस्यविस्तरः
स्वोछ्रायस्यार्धमूलोवाप्राकारःसममूलकः ॥३६ ॥
हीनानिम्नकदानाहोखणविस्तारहीतसा॥ पायाकोटासतोनिम्मेसमवाउंचिहूनियां ॥३६॥

त्रितीयांशकमूलोवाह्युछ्रायार्धप्रविस्तरः
उछ्रितस्तुतथाकार्योदस्युभिर्नविलंघ्यते ॥ ३७ ॥
किंवातृतीयांशरुंदीअर्धीरुंदीहुनीकरी ॥ ऊंचतैसाकरावाहोचोरांनींनाविलंघिजे ॥ ३७ ॥

यामिकैरक्षितोनित्यंनालिकास्त्रैश्चसंयुतः
सुबहुदृढगुल्मश्चसुगवाक्षप्रणालिकः ॥ ३८ ॥
पाहान्यांनींसदायुक्ततोफबंदूकमंडित ॥ बहूबुरुजशोभाढ्यगवाक्षींजागेनींतसा ॥ ३८ ॥

स्वहीनप्रतिप्राकारोह्यसमीपमहीधरः
परिखाचततःकार्याखाताद्विगुणविस्तरा ॥ ३९ ॥
पडकोटतसादूरअसावादूरपर्वत ॥ त्यापुढेंखंदकायोजीखोलीद्विगुणविस्तरें ॥ ३९ ॥

नातिसमीपप्राकाराह्यगाधसलिलाशुभा
युद्धसाधनसंभारैःसुयुद्धकुशलैर्विना ॥ ४० ॥
कोटाहूनीदूरथोडाअगाधजलशोभित ॥ युद्धाच्यासाधनींदक्षयुद्धींजेवीरत्यांविना ॥४०॥

नश्रेयसेदुर्गवासोराज्ञःस्याद्बंधनायसः
राज्ञाराजसभाकार्यासुगुप्तासुमनोरमा ॥ ४१ ॥
किल्ल्यांतवासनशुभनृपाबंधनकारण ॥ राजाकरीराजसभामनोरमसुरक्षित ॥ ४१

त्रिकोष्ठैःपंचकोष्ठैर्वासप्तकोष्ठैःसुविस्तृता
दक्षिणोदक्तथादीर्घाप्राक्प्रत्यग्द्विगुणाथवा।४२।
तीनकिंवापांचखणसातानेंवासुविस्तृत ॥ दाक्षिणोत्तरवालंबिद्विगुणापूर्वपश्चिमे ॥ ४२ ॥

त्रिगुणावायथाकाममेकभूमिर्द्विभूमिका
त्रिभूमिकावाकर्तव्यासोपकार्याशिरोगृहा ॥ ४३ ॥
अथवातिप्पटकरीएकमाज्लिदुमज्लिवा॥तिमाज्लिवाकरावीतीजसेंसुखाशिरोगृह ॥ ४३ ॥

परितःप्रतिकोष्ठेतुवातायनविराजिता
पार्श्वकोष्ठात्तुद्विगुणोमध्यकोष्ठस्यविस्तरः ॥ ४४ ॥
बाजूखणाप्रतिकरीगवाक्षातेंसदानृप ॥ बाजूहुनीदुप्पटतेंमध्यकोष्ठासविस्तर ॥ ४४ ॥

पंचमांशाधिकंत्वौच्चंमध्यकोष्ठस्यविस्तरात्
विस्तारेणसमंत्वौच्चंपंचमांशाधिकंतुवा ॥ ४५ ॥
पंचमांशाधिकउंचीविस्ताराहूनेमध्यमा ॥ विस्तारेंतुल्यवाउंचीनृपानेंकरिजेसदा ॥४५॥

कोष्ठकानांचभूमिर्वाछादिर्वातत्रकारयेत्
द्विभूमिकेपार्श्वकोष्ठेमध्यमंत्वेकभूमिकं ॥ ४६ ॥
कोष्टकावरतींगच्चीकिंवाखप्रेलतेंकरी ॥ दुमज्लीबाजुचेखानेएकमज्लीमधेंतसे ॥ ४६ ॥

पृथक्त्संभांतसत्कोष्ठाचतुर्मार्गागमाशुभा
जलोर्ध्वंघातियंत्रैश्चयुतासुस्वरयंत्रकैः ॥ ४७ ॥

वेगळेखणखांबांनींचारमार्गीसुशोभित ॥ नानातऱ्हेचींकारंजींवाजेनानाप्रकारचे ॥ ४७॥

वातप्रेरकयंत्रैश्चयंत्रैःकालप्रबोधकैः
प्रतिष्ठिताचस्वादर्शैस्तथाचप्रतिरूपकैः ॥ ४८ ॥

वायुयंत्रेंतसींनानाघड्याळेंहीबहूतसीं॥आरसेतसिबरानानाहांड्यागल्लासफाणस ॥४८॥

एवंविधाराजसभामंत्रार्थाकार्यदर्शने
तथाविधामात्यलेरव्यसभ्याधिकृतशालिकाः।४९।

अशीमहाराजसभाकामम्स्लतिलासदा।।तशादिवाणफड्णीसअदाल्तीलाहिकार्कुनां।४९।

कर्तव्याश्चपृथक्त्वैतास्तदर्थाश्चपृथक्पृथक्
शतहस्तमितांभूमित्यक्त्वाराजगृहात्सदा ॥ ५० ॥

पूर्वेसउत्तरेलावातयांसाठींचवेगळ्या ॥ हातशंभरभूलागींराजवाड्याहुनत्यजी ॥ ५० ॥

उदग्द्विशतहस्तांप्राक्सेनासंवेशनार्थिकां
आराद्राजगृहस्यैवप्रजानांनिलयानिच ॥ ५१ ॥

पूर्वेसदोनशेंहातसेनेसाठींत्यजीसदा ॥ राजवाड्यासजवळसुप्रजेचींघरेंबरीं ॥ ५१ ॥

सधनश्रेष्ठजात्यानुक्रमतश्चसदाबुधः
समंताच्चचतुर्दिक्षुविन्यसेच्चततःपरं ॥ ५२ ॥

असावींधनिकश्रेष्ठजातीचींहीअनुक्रमें ॥ समंताच्चारादिग्भागींदिवाणाचींतयापुढें ॥५२॥

प्रकृत्यनुप्रकृतयोह्यधिकारिगणस्ततः
सेनाधिपाःपदातीनांगणःसादिगणस्ततः ॥ ५३॥

दिवाणाचींपुढेंत्याच्यादरग्दारतयापुढें ॥ सेनापतीपुढेंत्यांच्यापल्टणेस्वारत्यांपुढें॥ ५३ ॥

साश्वश्चसगजश्चापिगजपालगणस्ततः
वृहन्नालिकयंत्राणिततःस्वतुरगीगणः ॥ ५४ ॥

पागापुढेंपीलखानातोफखानातयापुढें ॥ असावेहोपुढेंत्यांच्याशिलेदारींसवारते ॥ ५४ ॥

ततस्वगौत्मिकगणोह्यारण्यकगणस्ततः
क्रमादेषांगृहाणिस्युःशोभनानिपुरेसदा ॥ ५५ ॥
गोलवालेपुढेंत्याच्यानीचभिल्लादित्यांपुढें ॥ अनुक्रमेंपुढेंयांचींअसावींतघरेंपुरीं ॥ ५५ ॥

पांथशालाततःकार्यासुगुप्तासुजलाशया
सजातीयगृहाणांहिसमुदायेनपंक्तितः ॥ ५६ ॥
करीपुढेंपांथशाळासुगुप्तसुजलेंयुत ॥ येकेकजातिलोकांचेमहल्लेवेगवेगळे ॥ ५६ ॥

निवेशनंपुरेग्रामेप्रागुदङ्मुखमेववा
सजातिपण्यनिवहैरापणेपण्यवेशनं ॥ ५७ ॥
असावींनगरींग्रामींपूर्वेवाउत्तरोन्मुख ॥ दुकानेंयेकजातीचींदरपेठेंतवेगळीं ॥ ५७ ॥

धनिकादिक्रमेणैवराजमार्गस्यपार्श्वयोः
एवंहिपत्तनंकुर्यात्ग्रामंचैवनराधिपः ॥ ५८ ॥
सराफादिक्रमानेंहींराजमार्गांदुबाजुनीं ॥ अशा करावेंनगरागांवातेंहीनृपेंसदा ॥ ५८ ॥

राजमार्गास्तुकर्तव्याश्चतुर्दिक्षुनृपगृहात्
उत्तमोराजमार्गस्तुत्रिंशद्धस्तामितोभवेत् ॥ ५९ ॥
चारीदिशेराजमार्गांराजवाड्याहुनीकरी ॥ तोश्रेष्ठहोराजमार्गरुंदीनेंतीसहातजो ॥५९॥

मध्यमोविंशतिकरोदशपंचकरोधमः
पण्यमार्गास्तथाचैतेपुरग्रामादिषुस्थिताः ॥ ६० ॥
वीसहातींमध्यमतोपंध्रांच्याअधमावदा ॥ बाजारमार्गहेतैसेशहरींगांवींसहती ॥ ६० ॥

करत्रयात्मिकापद्यावीथिःपंचकरात्मिका
मार्गोदशकरप्रोक्तोग्रामेषुनगरेषुच ॥ ६१ ॥
त्रोतीनहाततीपद्यावीथीतीपांचहातजो॥दाहाहातांमार्गवदागांवांतनगरांतही ॥ ६१ ॥

प्राक्पश्चाद्दक्षिणोदक्तान्ग्राममध्यात्प्रकल्पयेत्
पुरंदष्ट्वाराजमार्गान्सुबहून्कल्पयेन्नृपः ॥ ॥ ६२ ॥
पुर्वेसपश्चिमेआणिदक्षिणोत्तरहीतसें॥पाहूनिशहराराजमार्गतेकरिजेबहू ॥ ६२ ॥

नवीथिंनचपद्यांहिराजधान्यांप्रकल्पयेत्
षड्योजनांतेरेरण्येराजमार्गंतुचोत्तमं ॥६३॥

नतीनहातपांचांचाराजधानींतमार्गहो ॥ चोवीसकोसरानींतोराजमार्गाचिउत्तम ॥६३॥

कल्पयेन्मध्यमंमध्येतयोर्मध्येतथाधमं
दशहस्तात्मकंनित्यंग्रामेग्रामेनियोजयेत् ॥६४॥

बाराकोशींमध्यमतोसाहांतअधमाकरी ॥ दहाहातकरावाहोप्रातिगांवांतमार्गतो ॥६४॥

कूर्मपृष्ठामार्गभूमिःकार्यग्राम्यैःसुसेतुका
कुर्यान्मार्गान्पार्श्वखातान्निर्गमार्थंजलस्यच ॥६५॥

कूर्मपाठतसामार्गग्राम्यलोकींसुपूलही ॥ करावींदोन्हिबाजूंसगटारेंपाणिजावया ॥६५॥

राजमार्गमुखानिस्युर्गृहाणिसकलान्यपि
गृहपृष्ठेसदावीथिंमलनिर्हरणस्छलं ॥६६॥

राजमार्गाकडेतोंडेंघरांचींनगरींसदा ॥ गल्लीघराचियामागेंमळाटाकावयास्छळ ॥६६॥

पंक्तिद्वयगतानांहिगेहानांकारयेत्तथा
मार्गान्सुधाशर्करैर्वाघाटितान्प्रतिवत्छरं ॥६७॥

घराचेदोहिंबाजूनींपंगतीकारिजेतशा ॥ चुन्खडीनेंयुक्तमार्गकरावेप्रतिवत्सरीं ॥६७॥

अभियुक्तानिरुद्धैर्वाकुर्यात्ग्राम्यजनैर्नृपः
ग्रामद्वयांतरेचैवपांथशालाप्रकल्पयेत् ॥६८॥

मजूरबाबंदिवानकरीगांवकरीनृप ॥ दोनगांवांमध्येंपांथशालेतेंकारिजेनृपें ॥६८॥

नित्यंसंमार्जितांचैवग्रामपैःश्चसुगोपितां
तत्रागतंतुसंपृछेत्पांथंशालाधिपःसदा ॥६९॥

राखावीसारवावीतीगांववाल्यांकडूनियां॥तिथेआल्यापुसावेंतत्स्वामिनेंसामुशाफरा ॥६९॥

प्रयातोसिकुतःकस्मात्क्कगछासिऋतंवद
ससहायोसाहायोवाकिंशस्त्रःकिंसवाहनः ॥७०॥

आलाघोठूनकांकोठेंजाणेंहेंसत्यतूंवद ॥ आहेनाहींसोबतकींशस्त्रतेंकायवाहन ॥ ७० ॥

काजातिःकिंकुलंनामस्थितिःकुत्रास्तितेचिरं
इतिपृष्ट्वालिखेत्सायंशस्त्रंतस्यप्रगृह्यच ॥ ७१ ॥

कायजातीकोणकुलनांवनिस्थितीकुठें॥लिहीपुसोनियांऐसेंरात्रींशस्त्रासघेउनी ॥ ७१ ॥

सावधानमनाभूत्वास्वापंकुर्वीतिशासयेत्
तत्रस्थान्गणयित्वातुशालाद्वारंपिधायच ॥७२॥

निजावेंसावधपणेंसांगावेंत्यावरीअसें ॥ सर्वांलोकांसमोजूनशालादारासलावेजे ॥ ७२ ॥

संरक्षयेद्यामिकैश्चप्रभातेतान्प्रबोधयेत्
शस्त्रंदद्याच्चगणयेद्वारमुद्घाट्यमोचयेत् ॥ ७३ ॥

पहाऱ्यानींरक्षिजावेंसकाळींउठवीतयां॥देऊनिशस्त्रामोजूनीउघडोनीदारसोडिजे ॥७३॥

कुर्यात्सहायंसीमांतंतेषांग्राम्यजनस्सदा
प्रकुर्याद्दिनकृत्यंतुराजधान्यांवसन्नृपः ॥ ७४ ॥

करावेंगांववाल्यांनींसीमेपर्यंतपावते ॥ दिनकृत्याकरीराजाराजधानींतराहुनी ॥ ७४ ॥

उत्थायपश्चिमेयामेमुहूर्तद्वितयेनवै
नियतायश्चकत्यस्तिव्ययश्चनियतःकति ॥७५॥

उठोनिरात्रींप्रहरचारघट्केंकरूनियां ॥ कितीजमानिश्चयानेंखर्चहीआजचाकिती ।७५।

कोशभूतस्यद्रव्यस्यव्ययःकतिगतस्तथा
व्यवहारेमुद्रितायव्ययशेषंकतीतिच ॥ ७६ ॥

खजीन्यांतीलद्रव्याचाझालाखर्चकितीअसे॥रुपयादिसाचिन्हाचाकितीखर्चजमाकिती ७६

प्रत्यक्षतोलेखतश्चज्ञात्वाचाद्यव्ययःकति
भविष्यतिचतत्तुल्यंद्रव्यंकोशात्तुनिर्हरेत् ॥ ७७ ॥

प्रत्यक्षलेखपाहूनीआजचाकितिखर्चतो॥ होईलतितुक्याद्रव्याकोशापासूनकाढिजे ॥७७ ॥

पश्चात्तुवेगनिर्मोक्षंस्नानंमौहूर्तिकंमतं
संध्यापुराणदानैश्चमुहूर्तद्वितयंनयेत् ॥ ७८ ॥

मलोत्सर्गासकरिजेमुहूर्तेंस्नानतेंमग ॥ पुराणसंध्यादानानींचारघट्केंसनेइजे ॥ ७८ ॥

संध्यापुराणदानैश्चमुहूर्तद्वितयंनयेत्
गजाश्वयानव्यायामैर्नयेत्प्रातर्मुहूर्तकं ॥ ७९ ॥

पुराणसंध्यादानानींचारघट्कैंसनेइजे ॥ गजघोडेकसरतीनेंमुहूर्तानेइजेनृपें ॥ ७९ ॥

पारितोषिकदानेनमुहूर्तंतुनयेत्सुधीः
धान्यवस्त्रस्वर्णरत्नसेनादेशविलेखनैः ॥ ८० ॥

नजाणादोनघटिकात्यालाबक्षीसहीतसें ॥ सुवर्णधान्यरत्नादिसेनादेशविलेखनीं ॥ ८० ॥

आयव्ययैर्मुहूर्तानांचतुष्कंतुनयेत्सदा
स्वस्छचित्तोभोजनेनमुहूर्तंससुहृन्नृपः ॥ ८१ ॥

पाहावेंहोजमाखर्चाआठघट्केंकरूनियां ॥ स्वस्छचित्तेंभोजनातेंमुहूर्तींआप्तसंयुत ॥८१॥

प्रत्यक्षीकरणाज्जिर्णनवीनानांमुहूर्तकं
ततस्तुप्राड्विवाकादिबोधितव्यवहारतः ॥ ८२ ॥

जुन्यानवीनवस्तूंचेंमुहूर्तेंपाहणेंकरी ॥ दिवाणीफौजदारीचाचारघट्काविचारतो ॥८२ ॥

मुहूर्तद्वितयंचैवमृगयाक्रीडनैर्नयेत्
व्यूहाभ्यासैर्मुहूर्तंतुमुहूर्तंसंध्ययाततः ॥ ८३ ॥

शिकारखेळणेंचारघडीनेंकरिजेनृपें ॥ कवायतमुहूर्तानेंसंध्याहीकारिजेतशी ॥ ८३ ॥

मुहूर्तंभोजनेनैवद्विमुहूर्तंचवार्तया
गुढचारःश्राविंतयानिद्रयाष्टमुहूर्तकं ॥ ८४ ॥

मुहूर्तभोजनानेंहीमुहूर्तेंदोनऐकिजे ॥ बातमीगुप्तदूतांचीनिद्रासोळाघडीकरी ॥ ८४ ॥

एवंविहरतोराज्ञःसुखंसम्यक्प्रजायते
अहोरात्रंविभज्यैवंत्रिंशद्भिस्तुमुहूर्तकैः ॥ ८५ ॥

असाजोवागतोराजापावतोसुखउत्तम ॥ दिनरात्रविभागूनीमुहूर्तेंतीसहेअसे ॥ ८५ ॥

नयेत्कालंवृथानैवनयेत्स्त्रीमद्यसेवनैः
यत्कालेह्युचितंकर्तुंतत्कार्यंद्रागशंकितं ॥ ८६ ॥

न्याबाकालअसाव्यर्थनतोस्त्रीमद्यसेवनें ॥ ज्याकालींजेंउक्तकर्मकरावेंशीघ्रनिश्चयें ॥८६॥

कालेवृष्टिःसुपोषायह्यन्यथासुविनाशिनी
कार्यस्थानानिसर्वाणियामिकैरभितोनिशं ॥८७॥

काळींपाऊससुखदअन्यथानाशहेतुतो ॥ कार्यस्थानासराखायाठेवावेपाहारेकरी ॥८७॥

नयवान्नीतिनातिवित्सिद्धशस्त्रादिकैर्वरैः
चतुर्भिःपंचभिःर्वापिषड्भिर्वागोपयेत्सदा ॥८८॥

गोडवाणीनम्रनीतिजाणतेशस्त्रधारक ॥ चारांकिंवापांचसाहायोजावेहेनृपेंसदा ॥८८॥

तत्रत्त्यानिदैनिकानिश्रुणुयाल्लेखकाधिपैः
दिनेदिनेयामिकानांप्रकुर्यात्परिवर्तनं ॥८९॥

ऐकावींतिथलींकृत्येंकार्कुनाच्यामुखेंसदा ॥ करावीनित्यबदलीपाहारेकरिफेरिनें ॥८९॥

गृहपंक्तिमुखेद्वारंकर्तव्यंयामिकैःसदा
तैस्तद्वृत्तंतुश्रुणुयात्गृहस्थभृतिपोषितैः ॥९०॥

ठिकठिकाणींफाटकतेशिपायांनींसुरक्षित ॥ देववीवेतनालोकींऐकेंव्रातमितन्मुखें ॥९०॥

निर्गछंतिचयेग्रामाद्येग्रामंप्रविशंतिच
तान्सुशंशोध्ययत्नेनमोचयेद्दत्तलग्नकान् ॥९१॥

गांवासोडूनजेजातीयेतींगांवांतजेनर ॥ करोनीचौकशीयांचीचिन्हेंदेऊनिसोडिजे॥९१॥

प्रख्यातवृत्तशीलांस्तुह्यविमृश्यविमोचयेत्
वीथिवीथिषुयामार्धैर्निशिपर्यटणंसदा ॥९२॥

प्रख्यातजेगुणेंशीलेंसोडावेनविचारितां ॥ रात्रीसचारघाडिनेंफिरावेंगस्तिनेंसदा ॥९२॥

कर्तव्यंयामिकैरेचचौरजारनिवृत्तये
शासनंत्वीदृशंकार्यंराज्ञानित्यंप्रजासुच ॥९३॥

शहरांतजसाकोणीफिरेनाचोरजारतो ॥ फिरवीनित्यदंवडीप्रजेलासमजावया ॥९३॥

दासेभृत्येथभार्यायांपुत्रेशिष्येपिवाक्वचित्
वाग्दंडपरुषन्नैवकार्यंमद्देशसंस्थितैः ॥९४॥

सेवकातेंनिजस्त्रीलापुत्राशिष्यासहीकदा ॥ बोलावेंव्यर्थनकडूकधींमत्पुरवासिहो ॥९४॥

तुलाशासनमानानांनाणकस्यापिवाक्कचित्
निर्यासानांचधातूनांसजातीनांघृतस्यच ॥ ९५ ॥
तोलआज्ञाहिवजननाणकाचेंकदापिही ॥ चिकाचेंआणिधातूचेंतुपाचेंबहुजातिचें ॥९५॥

मधुदुग्धवसादीनांपिष्टादीनांचसर्वदा
कूटंनैवतुकार्यंस्याद्बलाच्चलिखितंजनैः ॥ ९६ ॥
मद्यदूधतसेंमांसतेलपीठादिकांतही ॥ कधींकरीनकपटाजबरीनेंखताकदा ॥ ९६ ॥

उत्कोचग्रहणन्नैवस्वामिकार्यविलोभनं
दुर्वृत्तकारिणंचोरंजारंमद्वेषिणंद्विषं ॥ ९७ ॥
उचापतीलानबहूस्वामीकार्यासमोडता ॥ दुर्वृत्तचोरजारातेंराजाचाद्वेषिदुष्टजो ॥ ९७ ॥

नरक्षंत्वप्रकाशंहितथान्यानपकारकान्
मातृणांपितृणांचैवपूज्यानांविदुषामपि ॥ ९८ ॥
नेठेवावेगुप्ततसेदुजेहीअपकारक ॥ मातापित्यांचापुज्यांचाविद्वानांच्याकदापिहो ॥९८॥

नावमानंनोपहासंकुर्युःसद्वृत्तशालिनां
